वर्षम् 73
अङ्कः -10
प्रथमश्रावणमासः
विक्रमाब्दः 2080
युगाब्दः 5125
अगस्त, 2023

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख




गायको रामगाथायाः सञ्जातो योऽजरामरः ।
पूज्यते तुलसीदासः श्रावणे देशवासिभिः ।।

# विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ७ |
| ३ | श्रुत-बोध-कथा | डॉ. नारायणकाङ्कर: | ११ |
| ४ | मा वीरा विस्मृता भूवन् | डॉ. महेशचन्द्रशर्मा 'गौतमः' | १२ |
| ५ | नारायणशतकम् | पं. अमरदत्तशर्मा | १५ |
| ६ | भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम् | डॉ. योगिनी एच.व्यासः | १६ |
| ७ | राष्ट्रस्य नवसंसद्गृहम् | मिश्रोऽभिराजराजेन्द्रः | १७ |
| ८ | यूथिका | प्रो. ताराशंकरशर्मा पाण्डेयः | १७ |
| ९ | अमृतमयमुपास्यं राजते भारतं मे | डॉ. प्रीतिः पुजारा | १८ |
| १० | व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः | डॉ.रणजीतकुमारझाः | १९ |
| ११ | भट्टिमहाकाव्यस्य व्याकरणदृष्ट्याऽनुशीलनम् | सोनु देवी | २४ |
| १२ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २८ |
| १३ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका


संस्थापकौ

स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

श्रीश्यामशरणदेवाचार्यः

( निम्बार्कपीठम्, सलेमाबादः )

स्वामी रामभद्राचार्यः

( चित्रकूटः )

स्वामी अवधेशानन्दगिरिः

( हरिद्वारम् )

महन्तः गोविन्ददेवगिरिः

( पुणे )

स्वामी राघवाचार्यवेदान्ती

( अग्रपीठम् रेवासा )

महन्तः प्रतापपुरी

( तारातरामठम्, बाडमेरम् )

श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रोफेसर सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

सहायकसम्पादकः

डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

उपाध्यक्षौ

डॉ. नाथूलालसुमनः

डॉ. नन्दसिंहनरूका:

सचिवः

डॉ. सुधीरकुमारशर्मा

सहसचिवः

कृष्णकुमारशर्मा

व्यवस्थापकः

राजीवदाधीचः

9352030291



केन्द्रीय संस्कृत विश्वविद्यालय, शिक्षा मंत्रालय, भारत सरकार के अधीन के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित है।

कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

वेबसाईट : www.bhartipatrika.org

वर्षम् 73 अङ्कः -10

प्रथमश्रावणमासः

विक्रमाब्दः 2080

युगाब्दः 5125

अगस्त, 2023

एकस्याः प्रतेः 15/-

वार्षिकशुल्कम् 150/-

पञ्चवार्षिकशुल्कम् 700/-

आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# गोस्वामि-तुलसीदासो रामभक्तो विलक्षण:

...✍ प्रोफेसर श्रीकृष्णशर्मा

पाणिनीयसंस्कृतमाश्रित्य शेषावतारभूतो महाभाष्यकर्ता महामुनि: पतञ्जलिर्बभूव। तस्यैवांशावतारो यथा शब्देन्दुशेखर-मञ्जूषाद्यनेकग्रन्थप्रणेता भट्टनागेशोऽभिनवपतञ्जलिरिति मन्यते, तथैवाऽऽदिकाव्यरामायणस्य प्रणेतुर्वाल्मीकेरंशावतार एव गोस्वामी तुलसीदासोऽभिनव-वाल्मीकिरिति मन्यते लोके। आदिकाव्यं रामायणं लौकिकसंस्कृतस्यानुपमो ग्रन्थराशि:।

**'वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्।**
**रावणं मन्यमाना मां सीता भीता भविष्यति।।'**

इत्यादिरूपेण वाल्मीकिरामायणे हनुमतोक्तवचनात् संस्कृतं पुरा मानुषी लोकभाषासीत् परन्तदानीं (षोडश-शताब्द्यां) न तादृशी स्थिति:, केवलं संस्कृतविद्याकेन्द्रेषु लब्धाऽऽदरासीत्। अतश्चेशानुकम्पया तत्प्रेरणयैव च तुलसीदासमुखेन लोकभाषायाम् (हिन्द्याम्) एव सर्वजनहिताय सर्वजनगम्यो **'रामचरितमानस'** इति ग्रन्थो वाल्मीकिरामायणकथामप्यतिशयेन रुचिकरां प्रस्तौति।

यद्यपि किंवदन्तीयं यत् तुलसीदास: संस्कृतभाषायामेवादौ रामचरितमानसं निबद्धुमैच्छत्, तथापि महादेवस्य संकेतं कथमप्यवगम्य लोकभाषायामेव रामचरितं रचयामास। ग्रन्थादौ निर्विघ्नसमाप्त्यर्थं सरससंस्कृतशब्दावल्यामिष्टदेवतां स: स्तौति -

**वर्णानामर्थसङ्घानां रसानां छन्दसामपि।**
**मङ्गलानाञ्च कर्तारौ वन्दे वाणी-विनायकौ।।**
**भवानी-शङ्करौ वन्दे श्रद्धाविश्वासरूपिणौ।**
**याभ्यां विना न पश्यन्ति सिद्धा: स्वान्त:स्थमीश्वरम्।।**
**सीतारामगुणग्रामपुण्यारण्यविहारिणौ।**
**वन्दे विशुद्धविज्ञानौ कवीश्वर-कपीश्वरौ।।** इत्यादि।

सोऽयं सनातनकवि: १५५४ वैक्रमाब्दे श्रावण-शुक्ल-सप्तम्याम् अभुक्तमूलनक्षत्रे पं. आत्मारामस्य भार्याया 'हुलसी'ति नामधेयाया: गर्भजो जनिमलभत। प्रयागसमीपे चित्रकूटजनपदे 'राजापुर' ग्रामोऽस्य जन्मभूमिरिति प्रथिति:। सद्योजातोऽयं **'राम'** इत्युवाच, अत: प्रारम्भिकं नामापि **'राम बोला'** इत्यासीत्। स्वयं **विनयपत्रिकायामपि** लिखति -

**'राम को गुलाम नाम 'रामबोला' राख्यो राम,**
**काम यहै, नाम द्वै हौं कबहुँ कहत हौं।**
**रोटी लूंगा नीके राखै आगे हूँ की बेद भाखै,**
**भलो ह्वै है तेरो, ताते आनन्द लहत हौं।।'**

श्रीरामस्य दासोऽस्मीत्यतो जना मां **'राम बोला'** इत्येवं वदन्ति। लोकेऽस्मिन् 'राम-नाम' जपेन अन्न-वस्त्रादिव्यवस्था सौकर्येण भवति। पारलौकिकी चिन्तापि नास्ति, यतो वेदा: समामनन्ति यत् परमात्मनो ध्यानेन कल्याणम्भवतीत्यतोऽहं प्रसीदामीत्याशय:।

'तुलसीदास' इति नामास्य गुरुणा 'आनन्दोपाह्व' श्रीनरहरिणा दत्तम्। गुरुणैव रामचरितं श्रावितम् वेदशास्त्रपुराणादीनि चाध्यापितम्। विद्यामधीत्य गुर्वाज्ञया स्वजन्मभूमिमागत्य गृहस्थाश्रमे प्राविशत्। **'रत्नावली'** नाम्न्या कन्यया सहास्य परिणयो जात:। किंवदन्तीयमेकदास्य भार्या पितृगृहे गतवती स्वभ्रात्रा सह। तद्विरहमसहमानोऽयमपि तामन्वसरत्। सहसाऽऽयातमेनं दृष्ट्वा पत्नी रुषा न्यक्कृतवती, अवदच्च-

**'अस्थि-चर्ममय देह में जा में ऐसी प्रीत।**
**ऐसी प्रीत जो हरि में हों मिट जावे भवभीत।।'**

धिक्कृतस्तुलसीदासो वैराग्यमापन्नः प्रयागमागत्य साधुवेषधारी संजातः। गोस्वामिनाग्रे गत्वा **'वैरागयसन्दीपनी'** नामको मार्मिको लघुग्रन्थोऽपि लिखितो यदस्मिन् जगति जनैर्यादृशं कर्म क्रियते, तादृशमेव फलमुपभुज्यते। जगदेव दुःखबहुलं दुःखत्रयेण सन्तप्तं, भगवदाराधनामात्रमेक एव तच्छान्तेरुपायः। ग्रन्थोऽयं वेद-पुराणादिशास्त्र सिद्धान्तानां सारसंक्षेपः। यथा चोक्तम् -

**तुलसी यह तनु खेत है, मन वच कर्म किसान।**
**पाप-पुण्य द्वै बीज हैं, बवै सो लवै निदान।।**
**तुलसी यह तनु तवा है, तपत सदा त्रैताप।**
**सांति होइ जब सांतिपद, पावै रामप्रताप।**
**तुलसी वेद-पुराण-मत, पूरन शास्त्रविचार।**
**यह विराग सन्दीपनी, अखिल ग्यान को सार।।**

स्वप्ने शिवप्रेरणामवाप्य अयोध्यायां १६३१ वैक्रमे संवत्सरे **रामनवम्यां 'रामचरितमानस'** इति महाकाव्यं रचयितुमारभत गोस्वामी। वर्षद्वय, मास-सप्तक, षड्विंशति-दिवसात्मक-कालावधौ काव्यमिदं १६३३ वैक्रमवर्षे **मार्गशीर्षमासे** पूर्णतामगात्।

काव्येऽस्मिन् आदर्शभूतं-गार्हस्थ्यजीवनम्, राजधर्मः, पारिवारिकजीवनम्, पातिव्रत्यधर्मः, भ्रातृधर्मः, भक्ति-ज्ञान-त्याग-वैराग्य-सदाचाराणां सन्निबन्धमस्ति। आबालवृद्धेभ्यः समानमुपयोगार्होऽयं सद्ग्रन्थः भगवतः सगुणतां निरूपयन् **'सत्यं शिवं सुन्दरम्'** इत्याभाणकं चरितार्थयति। षोडशशब्द्यामाविर्भूतोऽद्वैतवेदान्तस्य परिव्राजकाचार्योऽपि **'अद्वैतसिद्धिरि'ति** प्रख्यातग्रन्थस्य रचयिता **श्रीमधुसूदनसरस्वती** 'रामचरितमानस' इति काव्यं संस्तुवन् लिखति -

**आनन्दकानने ह्यस्मिञ्जङ्गमस्तुलसीतरुः।**
**कवितामञ्जरी भाति रामभ्रमरभूषिता।।इति।**

अस्मिन् काशीरूपे आनन्दप्रदकानने गोस्वामी तुलसीदासः इतस्ततो भ्रमन् साक्षात् तुलसीवृक्ष एव। रामचरितमानसकवितास्तस्य तुलसीतरोर्मञ्जर्य इव भान्ति। तदुपरि भ्रमरस्वरूपः श्रीरामो गुञ्जतीत्यर्थः।

गोस्वामिनोऽपरो ग्रन्थोऽपि **'दोहावली'** इति। तत्र भक्ति-ज्ञान-वैराग्य-सदाचार-प्रीति-नीतिप्रभृति-विषयाः सरसश्लोकात्मक **'दोहा'** माध्यमेन प्रस्तुताः सन्ति। दिङ्मात्रमुदाह्रियते -

**मुखिया मुख सों चाहिए खान-पान कहुँ एक।**
**पालइ पोषइ सकल अंग तुलसी सहित विवेक।।**

मुखमिव प्रजापालको राजा भवेत्। भक्षण-पानादिकमेकं मुखमेव करोति, तथापि विवेकेन पालन-पोषणादिकं समेषामङ्गानां यथाकालं विदधाति। तथैवैकोऽपि राजा प्रकृतिरञ्जनं कुर्यादिति सरलार्थः।

महाकविस्तुलसीदासः संस्कृतस्य प्रकाण्डपण्डित आसीत्। ज्योतिष्-शास्त्रेऽपि तस्याप्रतिहता गतिरिति दोहावल्यां दृश्यते -

**ऊगुन पूगुन बि अज कृ म आ भ अ मू गुनु साथ।**
**हरो धरो गाडो दियो धन फिरि चढइ न हाथ।।**

ज्योतिष-शास्त्रे सप्तविंशतिर्नक्षत्राणि अश्विन्यादि रेवत्यन्तानि भवन्ति। तेषु चतुर्दश-नक्षत्राणि सन्ति येषु हृतं, धृतं, खातं प्रदत्तं च धनं पुनः सौकर्येण प्रत्यानीतं न

भवति। तानि नक्षत्राणि सन्ति – उत्तरात्रयम्, पूर्वात्रयम्, विशाखा, रोहितणी, कृत्तिका, मघा, आर्द्रा, भरणी, अश्लेषा मूलञ्चेत्याशयः। कलिधर्माधर्मनिरूपणं, हनुमान् चालीसाप्रभृतयोऽनेके तद्रचिता ग्रन्थास्सन्ति।

श्रूयते संवत् १६०७ तमे वर्षे मौनी-अमावस्यायां तिथौ बुधवासरे चित्रकूटघट्टे रामलक्ष्मणौ गोस्वामिनः समक्षमाविर्भूतौ। तुलसीदासः कर्णाभ्यां श्रुतवान् -

**चित्रकूट के घाट पर भइ सन्तन की भीर।**
**तुलसीदास चन्दन घिसें तिलक देत रघुवीर।।**

श्रुत्वा दृष्ट्वा च तुलसीदासोऽनिर्वचनीयमानन्दमवाप। सर्वमिदं हनुमत्कृपयेति गोस्वामी मन्यते स्म।

१६८० तमे वैक्रमाब्दे **श्रावणकृष्णतृतीयायां** तिथौ शनिवासरे भगवन्तं युञ्जान-योगिनं श्रीरामं मनो-वाक्-कायाभिः भजन्नेव काश्यामसी-घट्टे पाञ्चभौतिकं देहं तत्याज ब्रह्मैव सन् मोक्षञ्चावाप। वन्दे महापुरुष ते चरणारविन्दम्।

**- सम्पादकः**
जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये
संस्कृतविभागाध्यक्षचरः, जयपुरस्थ-जगद्गुरु-
रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये
व्याकरणपीठाध्यक्षचरश्च।, दूरभाषाङ्कः 8386943655

राष्ट्रीय विचारों के लिए पढ़ें

पाञ्चजन्य साप्ताहिक



Voice of the Nation
ORGANISER Weekly



हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को सुशोभित करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा

You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

वार्षिक ग्राहक शुल्क
पाञ्चजन्य ₹1450 (साधारण डाक द्वारा)
ORGANISER ₹1450 (by ordinary post)
विदेशों में $80 (विदेशों में हवाई डाक द्वारा)

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

भारत प्रकाशन (दिल्ली) लिमिटेड
द एड्रेस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई-मेल : advt@bpdl.in

क्रमशः

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ द्वादशस्सर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

नन्दप्रासादकक्षे यदुकुलपतिना प्रेषितो वीतनिद्रश्
शब्दाञ्छुश्राव नूनाञ्श्रुतिमधुरतमान्वर्हिणाम्पालितानाम्।
प्रातःप्रातःगवां तान्नवशिशुमुखजान् भक्तदूतःप्रियाणां
श्रीकृष्णं संस्मरंस्तं नवजलदरुचिं वेणुहस्तम्प्रसन्नम्।।१।।

श्रुत्वा तत्याज शय्यां दिनकरतनयावीचिसञ्जातशब्दान्
प्रातःप्राच्यामपश्यन्नवकिरणधरं बालसूर्यप्रकाशम्।
स्नात्वा सन्ध्यामुपास्य प्रतिदिनमिव स प्राप्य
दिव्याल्पभोज्यं
नन्दम्प्रोवाच गन्तुं सुललितमथुरां राजधानीं व्रजस्य।।२।।

सर्वं रम्यं यशोदामुखकजगदितं क्रीडनं श्रीहरेस्तद्
दिव्यं श्रीकृष्णबाल्यं सुललितचरितं लालनम्पालनं वा।
श्रावं श्रावं व्यतीतो हरिपदरतिदो मासपर्यन्तकालो
नाहञ्जाने कदा यन्नवसुखभरितो गोकुलेऽस्मिन्
मदीयः।।३।।

स्मारं स्मारं चरित्रं नटवरवपुषःकृष्णचन्द्रस्य दिव्यं
नन्दःप्रोवाच दूतं सुमधुरवचसा नीलकञ्जाभदेहम्।
कृष्णोऽस्माकं मुकुन्दःप्रियवचनकरो बाललीलाभिलाषी
नायास्यत्यत्र कर्तुं व्रजभुवि रमणं किं सखीभिस्सहैव।।४।।

गोबिन्दोऽसौ स्वगोपान्सकृदपि नहि किं वीक्षितुं
गोकुलेऽस्मिन्
नात्रागत्य स्वयं हि स्वमधुरमुरलीं श्रावयिष्यत्यपूर्वाम्।
दावाग्नेर्वातवर्षातपवृषभुजगाद् दुःखमृत्युप्रदेभ्यश्
श्रीकृष्णेनैव सर्वे वयमिह सततं रक्षिता राक्षसेभ्यः।।५।।

पार्श्वेऽस्माकं व्रजेशो मृदुतमवदनो गोकुलेऽस्मिन् कदाचिद्
धेनुप्रेमी किशोरो यदि सकृदपि स ह्येकदाप्यागतस्स्यात्।
तर्ह्यद्रक्ष्याम वक्त्रं सुमधुरसुनसञ्चेक्षणं सुस्मितं तद्
गोबिन्दस्य प्रियस्य व्रजकुलवनिताचित्तसम्मोहनस्य।।६।।

बाल्यादेवातिदिव्यम्प्रिययदुपतिना देवकीनन्दनेन
प्राकारि स्वस्वभावादनुपमरुचिरम्प्रोन्नतं यच्चरित्रम्।
स्वच्छं तत्तन्मनोज्ञन्नवरुचिरमणं वंशिकायाःध्वनिं च
स्मारं स्मारं भवामो वयमिह शिथिलास्सर्वकर्मक्रियासु।।७।।

सैवेयं सूर्यपुत्री नवजलरुचिरा गोकुलग्रामशोभा
कालिन्दी यत्र कृष्णःप्रतिदिनमधिकं गोपवृन्देन सार्धम्।
वारिक्रीडां चकार व्रजपतिमधुना वीचिभिश्चाह्वयन्ती
गोबिन्दोदन्तदासिन्!प्रवहति सततं कुर्वती तत्प्रतीक्षाम्।।८।।

सोऽयं शैलो विशालो हरिततरुधरो यं हि गोवर्धनाख्यं
हस्तेनैकेन कृष्णो व्रजजननिकरान् रक्षितुं संदधार।
तानीमानि स्थलानि प्रिययदुपतिना चारिता यत्र गावः
स्थित्वा चात्र व्रजेशो व्रजभुवि मधुरां नादयामास
वंशीम्।।९।।

सेयम्भूमिर्व्रजस्योद्धव!पदकमलं दृश्यते मे मुरारे-
र्गावो यत्र प्रकामं यदुकुलशशिनं पाययन्तिस्म दुग्धम्।
अत्रैवासौ जघान प्रियजलदतनुर्दुष्टदैत्यानजेयान्
स्मारं स्मारम्मुकुन्दं स्मितवदनममुं
विस्मरामस्स्वदेहम्।।१०।।

इत्येवं ब्रह्मकृष्णम्मनसि वचसि च स्थापयन् संब्रुवंस्तं
वात्सल्यस्नेहपूर्णो गिरिधररमणं चिन्तयन् गोकुलेशम्।
कृष्णस्यैकैकलीलां व्रजनिधिपसखं श्रावयन् वर्णयंश्च
प्रेम्णा श्रीनन्दरायस्स्मरणपरवशो रुद्धकण्ठो बभूव।।११।।

वात्सल्यस्नेहभावाद्यदुपतिजननीं वाष्पनेत्रां यशोदां
प्रेम्णा तस्यास्स्तनाभ्यां सुतयदुपतये दुग्धधारां वहन्तीम्।
दर्शं दर्शं यशोदापतिमतिविरहे कृष्णचन्द्रस्य नन्दम्
मग्नोऽभूदुद्धवोऽसौ व्रजपपदरतिर्नन्दवात्सल्यभक्तौ।।१२।।

दृष्ट्वा कृष्णेऽनुरागं भगवति च तयोःप्रीतिपूर्णम्प्रगाढं
तौ सम्प्राहोद्धवोऽसौ भगवति भवतोर्वर्तते प्रेमभक्तिः।
साक्षाद्विष्णुर्युवाभ्यामतिसुतरतितो लालितःपालितोऽसौ

संसारेऽस्मिन् भवन्तौ यदुपतिपितरौ भाग्यवन्तौ
महान्तौ।।१३।।

श्रीकृष्णस्सर्वमूलम्परमनियमनं कारणं कारणानां
साक्षान्नारायणोऽसौ परमनिगमनश्चेतनश्चेतनानाम्।
कर्ता धर्ता च हन्ता परमधिकरणम्मङ्गलम्मङ्गलानां
सर्वत्रैवोपलब्धो जगति निरुपमो व्यापको
व्यापकानाम्।।१४।।

काले काले स विष्णुस्समवतरति वै सर्वलोकान्तरात्मा
भारं हर्तुं धरायाःप्रतियुगमवितुं स्वस्य भक्तान् पृथिव्याम्।
सोऽयं कृष्णस्वरूपे व्रजभुवि भवतां देवकीनन्दनोऽसौ
कारागारेऽवतीर्य प्रमुदितवदनो नन्दयत्यद्य सर्वान्।।१५।।

कालेनाल्पेन कृष्णो व्रजजनललनानायको गोकुलेशो
द्रष्टुं सम्मेलितुञ्च व्रजमतिरमणं ह्यागमिष्यत्यवश्यम्।
एधस्यग्निर्यथास्ते सकलजनहृदि व्याप्य कृष्णस्तथालं
नो खिद्येताम्भवन्तौ सकलगुणनिधिं
द्रक्ष्यतःकृष्णमत्र।।१६।।

श्रीकृष्णस्य प्रियो वाप्रियसमविसमो नास्ति कश्चिच्च शत्रु-
र्मित्रम्माता पिता वा न च निजपरयोर्भावना वापि काचिद्।
नो देहो जन्म मृत्युर्नहि खलु सदसत् कर्म किञ्चिन्न रागो
लीलेयं तस्य सा सा परमभगवतो विद्यतेऽनेकरूपा।।१७।।

श्रीकृष्णो नास्ति पुत्रो जगति स युवयोरेव सर्वस्य पुत्रो
माता भ्राता पिता वा पतिरपितु सुहृज्ज्येष्ठमातामहो वा।
दृष्टम्भूतम्भविष्यन्महदणुरधिकं स्वल्पमप्यस्ति वा तत्
सर्वं कृष्णं विना नो किमपि भवति यद्दृश्यते
वस्तुरूपम्।।१८।।

श्रुत्वा विज्ञानपूर्णां यदुपतिविरहक्लेशसन्तापहन्त्रीं
दिव्यां वाचामुदारामवसरसुलभान्नव्यवैराग्ययुक्ताम्।
कालिन्दीकूलहर्म्ये विरहविलपतोःप्रौढयोर्गोकुले तौ
दम्पत्योश्शोकमोहावतिसुबिभिदतुर्नष्टदुःखावभूताम्।।१९।।

गोपानां राजधान्यामतिसरलतया सर्वगोपप्रवृद्धा-
नामन्त्र्याश्वास्य बुद्ध्या व्रजजनवनिता गोकुले लोकरीत्या।
नत्वा नन्दं यशोदामतिजिगमिषया सर्वमान्यान् बहिस्थं
प्रासादात् सज्जितं तं रथमथ मथुरामारुरोह प्रयातुम्।।२०।।

आरूढं तं सखायं यदुकुलशशिनस्स्यन्दने दूतवर्यं
गोपाःप्रोचुस्तदानीमतिसरलगिरा वाष्पनेत्राःविनम्राः।
चित्तेऽस्माकं मुकुन्दो यदुकुलतिलकस्सम्भवेत् सर्वदैव
श्रीकृष्णे नो रतिस्स्यात्प्रतिपलमधिकं रक्षके
वासुदेवे।।२१।।

वाणी कृष्णानुवादे वपुरपि च सदा सन्नमेन्नो व्रजेशं
कृष्णाज्ञाम्पालयेन्नो मतिरपि च मनश्चिन्तयेद्गोकुलेशम्।
यामःकुत्रापि योनौ क्वचिदपि च भवेज्जन्म कर्मानुसारं
नैवेच्छामस्स्वमोक्षम्भगवति नितरां सम्भवेत्
पूर्णभक्तिः।।२२।।

इत्युक्त्वा तैर्हि गोपैर्यदुकुलपतये प्रापणीयानि हस्तै-
रानीयोपायनानि स्वकरविरचितान्यद्वितीयानि तानि।
नाना रत्नानि तस्मिन् व्रजपतिहृदयैर्नन्दपुत्रं स्मरद्भिः
सश्रद्धं सप्रणामं सविनयमचिरं स्यन्दने स्थापितानि।।२३।।

कृष्णाय प्रेषणीयं सहृदयहृदयैरर्पितं वस्तु सर्वं
स्वीकृत्य प्रीतिबद्धं सजलनयनकैःकृष्णभक्तैरपूर्वम्।
सर्वान् गोपान् प्रणम्य व्रजपतिपितरौ चाभिवाद्योद्धवोऽसौ
नत्वा गोपालभूमिं यदुपतिमथुराम्मोक्षदां सम्प्रतस्थे।।२४।।

गच्छन् मार्गे व्रजेशं व्रजजनहृदयेष्वास्थितां कृष्णभक्तिं
स्मारं स्मारम्मुकुन्दं सुविमलहृदयो भक्तिमानुद्धवोऽसौ।
जन्मस्थानम्मुरारेरतुलितमथुरां राजधानीं व्रजस्य
श्रीकृष्णस्यातिदिव्यामसुरविरहिताम्पालितामाजगाम।।२५।।

स्वीकृत्यातिथ्यमिष्टम्प्रियमतिमधुरं कृष्णदूतो विशालं
राजप्रासादमन्तःयदुकुलशशिनं संस्मरन्नाविवेश।
आयान्तं शान्तचित्तम्प्रमुदितवदनो ज्ञानिनं ज्ञातभक्तिं
ह्यश्लिक्षत्तम्मुरारिःप्रियमतिसरलं कण्ठतो मित्रवर्यम्।।२६।।

का वार्ता मे प्रियाणां व्रजभुवि वसतां शास्त्रपारङ्गतानां
श्रेष्ठानां ब्राह्मणानामथ कथयतु मां का कथा गोकुलस्य।

गोपानां बान्धवानामपि च मम सखे !का दशा मे हि पित्रो
गावो वत्सा मयूराः सुकुसुमितलताःपादपाःवा कथं
ते ।।२७।।

स्मारं स्मारं विना त्वां तव शिशुचरितं कृष्ण !माता यशोदा
नन्दश्चापि प्रसन्नःपरिकरसहितस्त्वां सदा पश्यतस्तौ।
गोपा गावो मयूराःसुकुसुमितलताश्चिन्वते त्वां हि सर्वे
सर्वत्रैव प्रभो !ति व्रजभुवि नितरां गीयते शौर्यगाथा।।२८।।

श्रुत्वोदन्तम्प्रियं ते पुलकितमनसा संस्मरद्भिश्च सर्वैः
कंसारिं त्वाम्भजद्भिःप्रतिदिनमसुरध्वंसकारिन् !व्रजेश!
प्रत्यावृत्ते हि काले मम रथमभितश्चागतैर्गोपवृन्दैस्
तुभ्यं सम्प्रेषितानि स्वयमहमिकया सुन्दरोपायनानि।।२९।।

नन्दस्तुभ्यम्पिता ते धवलितमुकुटं बर्हिपुच्छस्य रम्यं
गोपी चैकातिरम्यां सुमधुरमुरलीं संददौ वादनाय।
मित्रैर्गोपालबालैस्ससुखमनुपमं कन्दुकं क्रीडनाया-
दत्तं गोपैर्विशिष्टं सरसिजमिव तन्नूतनं पीतवस्त्रम्।।३०।।

सद्यो जातम्प्रभूतम्मधुररुचिकरं स्वादु मिष्टं यशोदा
माता हैयङ्गवीनन्निजकरमथितं संददौ चारु तुभ्यम्।
अन्यैर्दुग्धं प्रदत्तं दधि मधु च घृतं शुद्धमच्छं नवीनं
गोपैश्श्रद्धालुभिस्तैःप्रतिदिनमधिकं संस्मरद्भिस्सदा
त्वाम्।।३१।।

दर्शं दर्शम्प्रदत्तानतिशयसुखदान् भक्तिपूतोपहारान्
श्रावंश्रावञ्च वाचन्प्रियतमसुहृदो गोकुलग्रामिभिस्तान्।
गोपीगोगोपवत्सव्रजकुलसुवधूवृक्षगुल्मौषधीनां
गोबिन्दो माधवोऽसौ निजहृदि वसताम्प्रेम्णि मग्नो
बभूव।।३२।।

दृष्ट्वा श्रीकृष्णचन्द्रम्मनसि वचसि तं गोकुलं संस्मरन्तं
वृन्दारण्यञ्च दिव्यं व्रजभुवि सरसं संस्थितं वर्णयन्तम्।
स्वीकुर्वन्तं समस्तान् विविधरसमयान् भक्तदत्तोपहारान्
ज्ञानीभक्तोद्धवोऽसावतिसरलहृदा स्नेहिनं तन्ननाम।।३३।।

नत्वा प्रोवाच कृष्णम्प्रभुवर !भवता प्रेषयित्वा व्रजम्मा-
मच्छं कार्यं कृतं ते मयि भवति कृपा सार्थकञ्जीवनम्मे।
धन्यञ्जातम्मनो मे तव पदकमले संरतं स्यादवश्यं
जाने भक्तिं विना मे भवभयहरणे जीवनं
व्यर्थमासीत्।।३४।।

शुष्कं ज्ञानं विना त्वां गिरिधर !मयि मां दर्पमुत्पाद्य सद्यो
मानामानादिजाले भ्रमवशसुदृढे पातयित्वा दुदाव।
भक्त्या तेऽभीष्टया मे भ्रमरहितहृदि प्रीतिपूर्णातितुष्टे
ज्ञानं क्लिष्टम्मदीयम्प्रतिपलमधुना नाधिकम्मां
दुनोति।।३५।।

भक्त्या सार्धं त्वया तास्स्वयमपि सह च त्वम्प्रियो
गोपिकाभि
र्यत्र क्रीडा कृता सा परमरसमयी रासलीलातिदिव्या।
भक्तैस्सन्तुष्टचित्तैर्व्रजरसरसिकैस्स्तूयतेऽद्यापि नूनं
धन्यं वृन्दावनं ते गिरिधरवर !तद् धाम
भक्तिप्रधानम्।।३६।।

तत्रैव श्यामलां ते परमरसमये धाम्नि सार्धं सखीभि-
र्भक्तिं शक्तिञ्च पूजामभिनवरुचिरश्रद्धयोपेतसेवाम्।
राधामाराधनां तां यदुकुलशशिनस्सुन्दरम्मोदमानं
नित्यक्रीडानिकुञ्जे तव मुखकमलं संस्मरन्तीं ददर्श।।३७।।

भक्तेस्तस्याःप्रभावाद्यदुकुलवर !ति धाम वृन्दावनं तद्
दिव्यं राराज्यतेऽहो परमसुखकरन्नामसंकीर्तनेन।
तत्र प्रेम्णा विवत्साम्यहमपि भगवन् गुल्मकुञ्जे स्थितस्सन्
कालिन्दीकूलपार्श्वे निखिलभयहरे
संस्मरंस्त्वाम्मुरारे!।।३८।।

राजप्रासादमध्ये नगरनरवृते वैभवे नीरसेऽस्मिञ्
जानेऽद्याहं रहस्यं नटवर! रमते नो मनोऽहो कथं ते?
भक्तिस्सैवाद्वितीया सरसरुचिकरा देवकीनन्दन !त्वां
नित्यं वृन्दावनस्था व्रजभुवि वसतां तोषयत्यन्तरङ्गा।।३९।।

यत्र श्रीराधिका त्वामपि च रसमयी भक्तिभावान्वितास्ताः
सख्यस्सर्वास्त्वदीया नवकुसुमधराःपादपाःवल्लरीणाम्।
केका वृक्षेषु नित्यम्भुवि मृदुलतृणान् संचरन्तश्च गावो

भक्तौ नृत्यन्ति मत्ताः परमसुखमपि प्राप्नुवन्ति
प्रभूतम्।।४०।।

कालिन्दी यत्र नित्यम्प्रवहति सततं तोयमादाय शीतं
वंशीनादस्त्वदीयस्सुमधुरसुखदश्श्रूयतेऽद्यापि कृष्ण!
पर्णे पर्णे त्वमेव प्रतिहरिततरु प्रेक्ष्यते गोपिकाभिः
कोणे कोणे सुरम्ये च सुललिततमे तस्य
वृन्दावनस्य।।४१।।

तत्रैवाहं सुरम्यं वनमतिसुखदम्प्राप्य गोविन्द! नित्यं
भक्त्यानन्दं रसं तं भवभयहरणम्पातुमिच्छामि सत्यम्।
दत्वा मह्यं स्वकीयामतिशयकरुणापूर्णदिव्यामनुज्ञां
नान्या काचित्स्पृहा मे गिरिधरवर!माम्प्रेषय स्वस्य
धाम्नि।।४२।।

ध्यायंध्यायं व्रजेशो व्रजहृदयमहो धाम वृन्दावनं तद्
ज्ञात्वा भक्तस्य भावं सरसिजनयनो माथुरःकृष्णचन्द्रः।
भक्तम्प्राहोद्धवं तं यदयमविरलो मेऽस्ति नित्यस्स्वभावो
यत्र श्रीराधिका मे निवसति रमणा तत्र नित्यं
वसामि।।४३।।

कालिन्दीकूलपार्श्वे व्रजभुवि नितरान्नित्यशोभायमानं
भव्यं रम्यम्मनोज्ञम्मम गृहमपरम्प्रेमपीयूषपूर्णम्।
रासक्रीड़ास्थलं सा स्वसखिपरिवृता दिव्यदेहा किशोरी
राधा वृन्दावनं तत्त्यजति नहि मम प्रेयसी धाम
दिव्यम्।।४४।।

बुद्धिर्मे ज्ञातुमिच्छत्यपरसुहृदयां सर्वदा श्रोत्रमेतच्
चक्षुर्मे द्रष्टुमेव श्रवणपरवशं श्रोतुमप्याशु राधाम्।
राधास्नेहेन बद्धा मम हृदयगतिर्मे मनश्चापि देहस्
तस्मान्नित्यन्निवासो भवति सुखमयस्तत्र वृन्दावने मे।।४५।।

या विद्यानां विधात्री त्रिभुवनमभितःपालयित्री प्रिया मे
सा राधा यत्र नित्यं विहरति विपिने प्रेम्णि साकं मयैव।
सान्निध्यम्प्राप्य तस्याः परमसुललितम्प्राप्तये मामपि त्वां
वृन्दारण्यम्पवित्रम्मम गृहमपरं तत्र गत्वा वस त्वम्।।४६।।

मत्वा संसारसारं हरिभजनमसौ सर्ववेदान्तसारं
श्रुत्वा कृष्णोपदेशं कतिपयदिवसानन्तरं शान्तचित्तः।
श्रीकृष्णाज्ञानुसारं हरिचरणरतिं धारयन् भक्तिमग्नो
राधागोबिन्दयुग्मं निजमनसि वहन्प्रस्थितःप्रेमभूमिम्।।४७।।

सर्वास्त्यक्त्वा स्वधर्मानतिविमलमतिःपूर्णनिष्कामचित्तो
हित्वा संसाररागं सरससुमधुरम् प्राप्य वृन्दावनं तद्।
नामं नामं सुरम्यं हरिततरुलतापुष्पपूर्णं निकुञ्जं
सश्रद्धं राधिकायाः व्रजरमणवने पार्श्वतस्तत्र रेमे।।४८।।

कालिन्दीकूलवृक्षेष्वतिरुचिरलतापुष्पगुच्छावृतेऽसौ
कुञ्जे शुभ्रे निकुञ्जे व्रजमृदुरजसि स्निग्धदूर्वाङ्कुरेषु।
स्थित्वा युग्मस्वरूपं यदुकुलशशिनस्संस्मरन् वेदविज्ञो
वृन्दारण्येऽतिरम्ये हरिशरणमतिर्भक्तिमग्नो बभूव।।४९।।

धन्यं वृन्दावनं तद् प्रतिदिनमभितो यत्र गोपाङ्गनानां
गीतं वाद्यं च नृत्यं भवति हि सततं कृष्णचन्द्रस्य भक्तौ।
भक्ता गायन्ति नृत्यन्त्यपि च सुरगणाः योनयो देवतानां
पल्वस्सौन्दर्यपूर्णाःहरिभजनरताःकिम्पुनर्मानवानाम्॥५०॥

स्खलितभक्तिरसस्य मनोरमान्
मम मुखादमृतद्रवरसकणान्।
अवलिहन्तु मनोहरया गिरा
पुनरहो रसिका हरिलम्पटाः।।५१।।

***********

इति द्वादशस्सर्गः परिसमाप्यते। अत्रैव परिसमाप्यते
गोपाङ्गनावैभवं संस्कृतमहाकाव्यमपि।

**सह-आचार्यः**
संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67

श्रुत-बोध-कथा -

# अनुकरणं फलेन्नहि

❑ स्व. कोविद-कुल-किङ्करः **डॉ. नारायणकाङ्करः**
राष्ट्रपति-सम्मानितः

अकाल-ग्रस्तौ दम्पती स्व-ग्रामं परित्यज्य सुदूरग्रामं प्रति प्रस्थितवन्तौ। मार्गे एकं वनम् आयातम्। सन्ध्यासमयः सञ्जातः आसीत्। रात्रौ अग्रे प्रस्थानम् उचितं न मत्वा तौ तत्र एव वने एक-वृक्ष-तले स्थितौ, तत्र एव सह आनीतं पथ्यं खादित्वा पीत्वा सुप्तौ, प्रातः प्रबुध्य च विचारितवन्तौ यत् 'किं न आवाम् अत्र वने सुलभघासादिना रज्जु-निर्माणं कुर्याव? पुनः तद्-द्वारा काष्ठानि च संगृह्य नयेव, मध्ये नगरे च विक्रीय धनम् अपि प्राप्नुयाव?'

एवं विचार्य यदा तौ दम्पती परस्परं सम्मिल्य रज्जु-निर्माणं कुर्वन्तौ आस्तां, तदा तद्-वृक्षोपरि निवासी भूतः तौ दम्पती पृष्टवान्- 'अरे! युवाम् इदं किं कुरुथः?' तौ अवोचताम्- 'आवां रज्जु-निर्माणं कुर्वः, पुनः एतद्-द्वारा त्वां बद्ध्वा नेष्यावः जन्त्वालये च त्वां सर्वैः द्रष्टुं त्यक्ष्यावः।'

भूतः भीतः भूत्वा अवादीत्- 'नहि नहि, एवं मा कुरुतं युवाम्। अहं युवां धन-सम्पन्नं करिष्यामि। माम् इह निवासात् मा नयतम्। अहं युवाभ्यां प्रचुरं धनं दास्यामि।' दम्पती धनम् एव तु प्राप्तुं ग्रामान्तरं गच्छन्तौ आस्ताम्। इदानीम् अनायासम् एव लभ्यमानं धनं श्रुत्वा अतीव प्रसन्नौ सञ्जातौ, भूत-वार्तां च स्वीकृतवन्तौ। भूतः ताभ्यां स्व-वचनानुसारं प्रचुरं धनं प्रदाय ततः विदायौ कृतवान्।

अधुना प्रचुरं धनम् आदाय दम्पती स्वगृहं प्रत्यावृत्तौ आस्ताम्। तयोः सम्पन्नतां विलोक्य प्रतिवेशी जनः तौ सम्पत्प्राप्तेः रहस्यं पृष्टवान्। सरल-स्वभावौ तौ सत्यं सत्यं कथितवन्तौ। इदानीं धन-लोलुपः प्रतिवेशी अपि स्वकीयान् कुटुम्बिनः आदाय तस्मिन् एव वृक्ष-तले प्राप्तः यत्र पूर्वं दम्पती स्थितौ आस्ताम्। सः रात्रौ सर्वान् अपि स्व-कुटुम्बिनः स्वं स्वं कार्यं कर्तुं कथितवान्। परन्तु निद्रा-व्याजं कृत्वा कश्चित् अपि तस्मै सहयोगं नैव दत्तवान्। केनचित् कथितम्- 'अहं श्रान्तः सञ्जातः अस्मि', अन्येन उक्तम्- 'मां निद्रा आयाति।'

भूतः पृष्टवान्- 'त्वं सकुटुम्बः किमर्थम् आयातः असि? परिवार-प्रमुखः स्त्रीयम् आगमनोद्देश्यं कथितवान्। तदा भूतः तम् अवोचत्- 'अरे! त्वं यदा स्व-कुटुम्बिनः एव स्व-वशे कर्तुं न शक्नोषि, तदा मां तु कथं करिष्यसि? अतः द्रुतम् इतः पलायस्व, अन्यथा अहं त्वां सकुटुम्बम् एव मारयिष्यामि।'

भूत-मुखात् इदं श्रुत्वा तु सर्वे अपि स्व-प्राणरिरक्षिषया ततः द्रुततरम् एव पलायितवन्तः इति।

क्रमानुगतम् -

# मा वीरा विस्मृता भूवन्

## ( शौर्यगाथा )

❑ डॉ. महेशचन्द्रशर्मा 'गौतमः'
साहित्य-अकादम्या पुरस्कृतः

पाकिस्तानस्य दुष्टतापूर्णो व्यवहारो न कदापि व्यरंसीत्। निदर्शनरूपेण काश्चन समुत्पत्तयः सङ्केतरूपेणात्र प्रस्तूयन्ते। १९४८ संवत्सरस्याप्रैलमासे नृशंसा आक्रान्तारः राजौरीक्षेत्रमासाद्य तत्रत्याः प्रजा अपिपीडन्। प्रणष्टविनयाः समुद्धताश्च शत्रवस्तत्राकृतापराधान् जनानवधिषुः। लुण्ठनैर्बलात्कारैरन्यैश्चामानुषैः कृत्यैरात्मनो दौर्जन्यं व्यञ्जन्तः शत्रवोऽसभ्यवदाचारिषुः। भारतीयसैन्यबलमागमनादवरोद्धुमास्कन्दिनः राजौरीपर्यन्तं सम्पूर्णे मार्गे बारूदिसुरङ्गान् व्याततिषुः। गोलीवर्षस्य नैरन्तर्यादत्यन्तं दुष्करमवर्तिष्टैतेषां सुरङ्गाणामपनयनम्। निष्करुणहत्या बलात्कारान् लुण्ठनानि च संलक्ष्यागतान् आस्कन्दिनः शत्रून् निग्रहीतुं भारतीयसैन्यबलस्य युद्धोपकरणयानैः सह राजौरीमभ्यासादनमतिनिर्बन्धेनापेक्षितमवर्तिष्ट। अतः टैङ्कस्य श्राये बारूदिसुरङ्गाणां मध्यतो गमनस्य मार्गं रामाराघोबाराणे-महाभागोऽन्वैषीत्। अकस्मात् स वर्तुलाकारमेकं गर्तमवलोक्य शत्रुभिस्तत्र स्थापितं बारूदिसुरङ्गं पर्यज्ञासीत् सपद्येव च सङ्केतेन टैङ्कं रुद्धगतिमचीकरत्। राणेमहाभागः पङ्क्लिप्तैः कराग्रैः सदाक्षिण्यं साध्यवसायञ्च तं बारुदिसुरङ्गं निष्क्रियं विधाय टैङ्कप्राजकं पुनरग्रे प्रवर्तितुमससङ्केतत्।

**टिप्पणीः** व्यरंसीत् - रुका (वि ✓ रम्, लुङ्, प्र.पु.ए.व., 'व्याङ्परिभ्यो रमः' पा.सू. १.३.८३ इति परस्मैपदम्), आसाद्य - आक्रमण करके, व्याततिषुः - बिछा दी, फैला दी, युद्धोपकरणयानैः सह - बख्तरबन्द गाड़ियों के साथ, अभ्यासादनम् - हमला करना, घेरना, अतिनिर्बन्धेन - आवश्यक रूप से, urgently, श्रायः - बचाव, आड़।

**सरलार्थः** पाकिस्तान का दुष्टतापूर्ण व्यवहार कभी भी रुका नहीं। उदाहरण के रूप में कुछ घटनाएँ सङ्केत रूप में यहाँ प्रस्तुत की जा रही हैं। अप्रैल १९४८ में उपद्रवी आक्रान्ताओं ने राजौरी क्षेत्र पर आक्रमण करके वहाँ के लोगों को पीड़ित किया। शिष्टाचार से रहित और उद्दण्ड शत्रुओं ने वहाँ पर निरपराध लोगों की हत्या कर दी। लूट, बलात्कार और दूसरे अमानुषिक कृत्यों से अपनी दुर्जनता व्यक्त करते हुए शत्रु जंगलियों जैसा आचरण कर रहे थे। भारतीय सैन्यबल को आने से रोकने के लिए आक्रमणकारियों ने राजौरी तक पूरे रास्ते में बारूदी सुरङ्गें बिछा दी। निरन्तर गोलियों के बरसने के कारण इन सुरङ्गों को हटाना मुश्किल था। निर्दयतापूर्ण हत्याएँ, बलात्कार और लूटपाट को लक्ष्य बनाकर आये हुए शत्रुओं को दण्ड देने के लिए भारतीय सेना का बख्तरबन्द गाड़ियों के साथ राजौरी को घेरना अत्यावश्यक रूप से अपेक्षित था। इसलिए टैंक की आड़ में बारूदी सुरङ्गों के बीच से जाने का रास्ता रामा

राघोबा राणे महोदय ने ढूँढ लिया। अकस्मात् उसने एक गोलाकार गड्डा देखकर शत्रुओं द्वारा वहाँ स्थापित बारूदी सुरङ्ग को पहचान लिया और तत्क्षण सङ्केत से टैंक को रुकवा दिया। राणे महोदय ने कीचड़ से सनी अँगुलियों से कुशलता से और परिश्रम से उस बारूदी सुरङ्ग को निष्क्रिय बनाकर टैंक के चालक को फिर से आगे बढ़ने के लिए सङ्केत दे दिया।

**आत्मनो द्वाविंशतिसाहाय्यकारिभिः सह बारूदिसुरङ्गाणामपनयनं मार्गाणां सैन्यबलस्योपयोगाय सज्जीकरणञ्चावर्तिष्ट रामाराघोबा-राणेमहाभागस्याभियोज्यता। मार्गे क्वचित् क्वचिदेतादृशा गर्ता अप्यवर्तिषत ये प्रावृषि दशपादप्रमाणपर्यन्तमधोगता अजनिषत। एते समर्पिता वीराः प्रायः कार्यं सम्पादयन्त एव यथाशक्यमल्पमात्रं किञ्चिदशित्वाऽविश्रान्तं बारूदिसुरङ्गानपनीय टैङ्कानां क्रमणाय मार्गमसज्जिषत। भारतीयसैन्यबलानि यथाशीघ्रं राजौरीं प्राप्यावस्कन्दिनो निगृह्य तेषां बलात्कारलुण्ठनवधाद्यपकर्मभ्योऽकृतापराधान् स्थानीयजनान् परित्रायेरन्नेतदर्थं त्वरितगत्या मार्गाणां सज्जीकरणमपेक्षितमवर्तिष्ट। सेकण्ड-लेफ्टिनेण्टरामाराघोबाराणे-महाभागस्य नेतृत्वे कर्मनिष्ठा दीर्घप्रयत्नाश्च भारतीयसैनिकाः शत्रुभिः कार्त्स्न्येन ध्वस्तं राष्ट्रियराजमार्गं युद्धोपकरणयानैः टैङ्कैश्च सह भारतीय-सैन्यबलस्य क्रमणायोपयुक्तं व्यधुः।**

**टिप्पणीः** असज्जिषत - तैयार कर रहे थे (√ षस्ज गतौ, लुङ्, प्र.पु.ब.व.)

**सरलार्थः** अपने बाईस सहायकों के साथ बारूदी सुरङ्गों को नष्ट करना और रास्तों को सेना के उपयोग के लिए तैयार करना रामा राघोबा राणे महोदय की ज़िम्मेदारी थी। रास्ते में कहीं-कहीं ऐसे गड्ढे भी थे जो बरसात में दस फुट तक गहरे हो जाते थे। ये समर्पित वीर प्रायः काम करते हुए ही जितना हो सकता था थोड़ा सा कुछ खाकर बिना रुके बारूदी सुरङ्गों को हटाकर टैंकों के जाने के लिए मार्ग तैयार कर रहे थे। भारतीय सेना के वीर यथाशीघ्र राजौरी पहुँचकर आक्रमणकारियों को दण्डित करके उनके बलात्कार, लूट, हत्या आदि कृत्यों से मासूम स्थानीय लोगों को बचायें इसके लिए तीव्र गति से मार्गों को तैयार करना अपेक्षित था। सेकण्ड लेफ्टिनेण्ट रामा राघोबा राणे महोदय के नेतृत्व में कर्मनिष्ठ और लगातार प्रयत्न करने वाले भारतीय सैनिकों ने शत्रुओं द्वारा पूरी तरह ध्वस्त कर दिये गये राष्ट्रीय राजमार्ग को बख्तरबन्द गाड़ियों और टैंकों के साथ भारतीय सेना के जाने के लिए उपयुक्त बना दिया।

**१९४८ तमे ईसवीयसंवत्सरेऽप्रैलमासस्याष्टम्यां तिथौ भारतीय-सैन्यबलं नौशेरात उत्तरस्यां दिशि एकादशकिलोमीटराणि दूरस्थं बरवालीरिजमाक्रम्य पर्यग्रहीष्ट। एवमपराह्णं यावच्छत्रूनभिभाव्य बरवालीरिजस्य परिग्रहणानन्तरमप्यग्र उच्चावचे बारूदिसुरङ्गैर्युक्ते शैलेये मार्गे क्रमणं दुष्करमभूत्। सपद्येवात्मनः साहाय्यकारिभिः सह राणेमहाभागो बारूदिसुरङ्गाणामपनयने व्यासक्तोऽभूत्। शीघ्रमेव सन्ध्याया अवतमसं सर्वत्र प्रासार्षीत्। पूर्वमस्माकं पराक्रमिभिर्योद्धृभिर्व्यपाकृता उपद्रविणः शत्रवः**

**पुनरागत्य गोलिकावर्षमारप्सत। व्याला अवस्कन्दिनो बारूदिसुरङ्गाणामपनयने व्यासक्तेष्वस्माकं सैनिकेषु मोर्टारेण प्राहार्षुः। दौर्भाग्येणास्मिन् सम्पराये मातृभूम्याः सम्मानरक्षायज्ञे व्यापृता राणेमहोदयस्य चत्वारः साहाय्यकारिण आत्मनो जीवनान्यहौषुः। आदरणीयेष्वेषु बलिदानिषु अम्बाजीमोरे रघुनाथमोरे सीतारामसुतारः केशव आम्ब्रे च सन्ति श्रद्धया स्मरणीयाः। अस्मिन्नाक्रमणेऽत्यधिकं परिक्षतपृष्ठवंशोऽपि लांस-नायक एम.के.जाधव आत्मनः कर्त्तव्यं न व्यस्मार्षीत्, परमेष वीर आजीवनं पक्षाघातग्रस्तोऽस्थात्। यद्यपि गम्भीरं परिक्षता रामाराघोबाराणेमहोदयस्य जङ्घा निरन्तरं रुधिरं प्रावाक्षीत् तथाप्येष वीरोऽनितरसाधारणं पराक्रमं प्रदर्शयन् शत्रून् पर्यवास्थित।**

**टिप्पणी:** अवतमसम् – झुटपुटा, व्यपाकृताः – दूर भगाये हुए (ब.व.), सम्पराये – मुठभेड़ में।

**सरलार्थ:** ईस्वी सन् १९४८ में अप्रैल महीने की आठ तारीख़ को भारतीय सेना ने नौशेरा से उत्तर की ओर ग्यारह किलोमीटर दूर स्थित बरवाली रिज पर आक्रमण करके क़ब्ज़ा कर लिया। इस प्रकार दोपहर बाद तक शत्रुओं को पराजित करके बरवाली रिज पर क़ब्ज़े के बाद भी आगे ऊँचे नीचे बारूदी सुरङ्गों से युक्त पहाड़ी रास्ते पर चलना कठिन हो गया। शीघ्र ही अपने सहायकों के साथ राणे महोदय बारूदी सुरङ्गों को हटाने में लग गये। जल्दी ही साँझ का झुटपुटा सब ओर फैल गया। पहले हमारे पराक्रमी योद्धाओं द्वारा भगाये हुए उपद्रवी शत्रुओं ने फिर से आकर गोलियाँ बरसानी शुरू कर दी। दुष्ट आक्रमणकारियों ने बारूदी सुरङ्गों को नष्ट करने में लगे हमारे सैनिकों पर मोर्टार से हमला किया। दुर्भाग्य से इस मुठभेड़ में मातृभूमि के सम्मान की रक्षा रूपी यज्ञ में लगे हुए राणे महोदय के चार सहायकों ने अपने जीवन होम कर दिये। इन आदरणीय बलिदानियों में अम्बाजी मोरे, रघुनाथ मोरे, सीताराम सुतार और केशव आम्ब्रे श्रद्धा से स्मरणीय हैं। इस आक्रमण में रीढ़ की हड्डी के अत्यधिक ज़ख़्मी होते हुए भी लांसनायक एम.के. जाधव अपना कर्तव्य नहीं भूले, परन्तु यह वीर आजीवन पक्षाघात ग्रस्त रहा। यद्यपि गम्भीर रूप से ज़ख़्मी रामा राघोबा राणे महोदय की जंघा निरन्तर खून बहा रही थी तथापि यह वीर अनितरसाधारण पराक्रम का प्रदर्शन करता हुआ शत्रुओं का मुकाबला करता रहा।

*क्रमशः ...*

**-पटियाला, पञ्जाब, दूरभाषाङ्कः 9781124775**

# पाठक-प्रतिक्रिया

बहुत सुन्दर। धन्यवाद। संस्कृत-साहित्य को विस्तार देने में संस्कृत भारती पत्रिका की भूमिका गौरवान्वित करने वाली है। इसलिए आप बहुत बधाई के पात्र हैं।

**– डॉ. महेशचन्द्र शर्मा 'गौतम'**
साहित्य अकादमी से पुरस्कृत
पटियाला (पञ्जाब), दूरभाषः ९७८११२४७७५

क्रमशः

# नारायणशतकम्

❑ पं. अमरदत्तशर्मा

( ४१ )

लक्ष्मी-धर्म-विवेक-शान्ति-सुयशो-
वैराग्य-वृन्दो बुधैः
लीलापङ्कजमीरितं तदखिलं विश्वं, धृतं तत् त्वया।
योगः सांख्यमुभौ तव श्रवणयोः स्तो भालसत्कुण्डले
लोको वेधस एव तेऽस्ति मुकुटं दिव्यं च नारायण!

( ४२ )

दैत्यं पञ्चजनं दरोदरगतं स्वर्गौकसां द्वेषिणम्
हत्वात्मायुध शुद्धरूपमददाद, हस्तेऽधरत् तं भवान्,
अम्भस्तत्वमयः सुधांशुधवलस्ते पाञ्चजन्योदरः
गम्भीरध्वनिना धुनोत्यखिलं हे कृष्ण नारायण!

( ४३ )

चक्रं चाधिगतं खरं स्मरहरात्, शस्त्रास्त्रवर्गोत्तमम्
यत्रून् रक्षति सत्तमान् दिविषदः संपूजितं वज्रिणा,
तेजस्तत्त्वममोघमग्निसुशिखं यत् कालचक्रोपमम्
दिव्यास्त्रं च सुदर्शनं वहसि तच्छत्रुघ्न नारायण!

( ४४ )

चक्राकारकुशेशये विलसितं यद् भाग्नि तेजस्विनी
तद्दंष्ट्रा निशिता लसन्त्यधिमुखं, केशैः शिरः पिङ्गलैः,
कान्तं कोकनदाभनेत्रयुगलं दोर्भिश्चतुर्भिर्युतम्
रूपं तेऽस्ति सुदर्शनं जगदिदं त्रातुं च नारायण!

( ४५ )

युक्ता शक्तिभिरिन्द्रियैर्विलसिता या प्राणतत्त्वान्विता
याऽमेध्या गदरक्षसोऽस्थिरचिता स्वर्गे सुरै रक्षिता,
देवैरर्चितया तया जघनिथेन्द्रारिं च हेतिं विभो
विद्याऽऽद्येति गदास्ति तां निजकरे धत्से च नारायण!

( ४६ )

अस्थिभ्यः परमेष्ठिनेरितगदो दत्तानि तस्मै मुदा
सोऽयच्छत् सुरशिल्पिने,व्यरचयत् कौमोदकीं तां गदां,
हेतिः प्राप यदा पुरन्दरपदं तं त्वं तया चावधीः
तस्मादादिगदाधरः समभवो हेतिघ्न नारायण!

( ४७ )

कण्वर्षेस्तपसः स्थलेऽतिसरलं वेणुं ददर्शात्मभूः
लोकानुग्रहहेतवेऽलभत तं चापत्रयं निर्ममे
तेभ्यस्ते प्रददौ सपत्नशमनं चामोघमेकं धनुः
तेनैवावसि भक्तलोकमखिलं शार्ङ्गेण नारायण!

( ४८ )

ये कर्कोटकवासुकीप्रभृतयो नागास्तु दौवारिकाः
ते त्वां प्राञ्जलयः स्तुवन्ति विनता ध्यायन्ति रूपं तव
वेष्टुं कोऽपि न धाम तेऽस्ति सबलञ्चैषां निदेशं विना
जीवं ते शरणं नयन्ति दिशसे शान्तिं च नारायण!

( ४९ )

श्रीमद् धामनिवासि पार्षदगणाः, दोर्भिश्चतुर्भिर्युताः
विष्वक्सेनमुखाः सुनीलवपुषो नीलारविन्दक्षणाः
दिव्याभास्तडिदम्बराः स्मितमुखाः सौन्दर्य-सद्राशयः
नानारत्नविभूषणाः परिकरास्ते सन्ति नारायण!

( ५० )

सर्वत्रैव सदैव शक्तिसहितोऽजेयस्त्रिलोक्यामसि
येषां ते शुभसन्निधिश्च सुलभा नित्यं च ते पार्षदाः
धन्याः सन्ति भवत्सुदर्शनपरा द्वारिस्थिता रक्षकाः
एतेषामपि पादपांशुरनिशं वन्द्योऽस्ति नारायण!

# भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्

❑ डॉ. योगिनी एच्.व्यास:

श्रीमत्स्वस्त्ययनं समस्तधरणीकल्याणरत्नाकरं
न्याय्यं धर्म्यमथार्थ्यमुत्तमपथं कर्मण्यताप्रेरकम्।
श्रेय: सर्वजनीनमाशु रचयत् संवित्प्रभासञ्चितिम्
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

कीर्तिर्यस्य विराजते सुविपुला गङ्गेव नो भारते
पुण्यैर्वैदिकपाञ्चजन्यनिनदैर्यच्चान्वहं जृम्भते
सानन्दं च सदानुरागदशतां ध्यायन्ति च भावुका:
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

यच्चैवं वसुधाकुटुम्बकमिति प्रज्ञां प्रसोसूयते
संसारे पुरुहूतराज्यमिव च प्रेम्णेह तोष्ट्रयते।
संगच्छध्वमहोऽथ विश्वविहगा: सत्यं हितं भाष्यताम्
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

त्रैलोक्याधिपति: गुणाब्धिवरदो धर्मस्य संरक्षको
ब्रह्मण्यो जितक्रोधपुण्यचरितो राजाधिराजस्तदा।
विद्या वागिव यामसूत धरणी पुण्या प्रिया जानकी
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

यावत् भाति धरातले मृदुजला गंगा पवित्रा नदी
यावत् सूर्यशशाङ्कयोश्चिरप्रभा विभ्राजते भूतले।
किष्किन्धात: सेतुकार्यसयुजा रामप्रिया रोमशी
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि रम्या कथा
नित्यं दाक्ष्यबलप्रभानययुतो वातात्मजो मारुति:।
शब्दब्रह्मविद: कवे: परिणतां प्राज्ञस्य वाणीमिमाम्
भूयादद्य गृहे गृहे विलसितं हे राम! रामायणम्।।

- गांधीनगरम्, गुजरातराज्यम्


हार्दिक शुभकामनों सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

**उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें**

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# राष्ट्रस्य नवसंसद्गृहम्

❑ मिश्रोऽभिराजराजेन्द्रः
पद्मश्रीः, पूर्वकुलपतिः

देवात्मकं मन्त्रात्मकं यन्त्रात्मकं धर्मात्मकम्।
जयतीह पुरुषार्थात्मकं राष्ट्रस्य नवसंसद्गृहम्।।१।।

प्राक् संसदासीदाङ्ग्लशासनदासतापरिचायिका।
ननु नूतनं स्वातन्त्र्यदुन्दुभिघोषनन्दितभूतलम्।।२।।

देवास्त्रयो हरिहरशिवास्त्रिगुणाश्च सत्त्वरजस्तमः।
कालेऽप्यतीताऽनागताऽगतरूपमेव गतित्रयम्।।३।।

त्रिभुजो ध्वजस्त्रिविधं वयस्त्रिविधश्च योगी वर्णितः।
त्रिभुजत्वमेव सुसिद्धिदं **त्रिभुजं ततस्संसद्गृहम्**।।४।।

स्थापत्यशास्त्रे गोमुखं भवनं बुधैरभिनन्दितम्।
स्वस्तिकमिदञ्च समुच्यते तादृशमिदं संसद्गृहम्।।५।।

यत्र प्रतिष्ठापित उपर्यथ **राजदण्डो देवता।**
**सैंगोल**-चामीकरवपुर्यच्चिन्मयं संसद्गृहम्।।६।।

मनुना स्मृतौ खलु **दण्डदेवो विष्णुपुत्रः कल्पितः**।
साक्षादयं धर्मात्मकः ऋतसत्यमार्गनियामकम्।।७।।
राजाऽपि दण्डसुसेवको दण्डाद् बिभेति यथा खलाः।
नृपमप्यहो धर्मच्युतं दण्डो निहन्त्यथ सत्वरम्।।८।।

तस्यैव सञ्जाता प्रतिष्ठा न्यायमन्दिरसंसदि।
**तेनैव यातं विश्वगुरुतां भारतं ननु भा-रतम्**।।९।।

आसन्नमेव हि **रामराज्यं** भारतीया जानते।
नूनं तदर्थमपेक्षितं ह्यासीन्नवं संसद्गृहम्।।१०।।

इयमस्ति धर्मसभा युधिष्ठिर-निर्मिता **कृष्णान्विता**।
न च कौरवेभ्यो रोचतेऽथ यथाऽप्युलूकेभ्यो दिनम्।।११।।

ऐन्द्री सभेयं यत्र भवितारो हि देवा मोदिनः।
असुरास्तु विलपिष्यन्ति कुर्वाणाः स्वपापविवर्धनम्।।१२।।

जनतन्त्रतीर्थमिदं शुभं भारतभविष्यसुमङ्गलम्।
वन्दामहे संसद्गृहं नवनिर्मितं संसद्गृहम्।।१३।।

- शिमला ( हिमाचलप्रदेशः )

# यूथिका

'स्रग्विणी' वृत्ते गजलिका

❑ प्रो. ताराशंकरशर्मा पाण्डेयः

फुल्लिता मालिनीत्रोटिता यूथिका।
पूजकैः शंकरायार्पिता यूथिका।।1।।

कानने या द्रुमालम्बिता वल्लरी।
सैव फुल्ला सुगन्धा नवा यूथिका।।2।।

केशपाशे तया कान्तया सज्जिता।
पुष्पमालास्वरूपा नवा यूथिका।।3।।

मानसोद्वेलितः प्रेममेघः प्रियः।
तेन सिक्ता सुगन्धायिता यूथिका।।4।।

कृष्णराधाकराभ्यां सह त्रोटिता।
स्पर्शरोमाञ्चिता राधिका यूथिका।।5।।

राधिकानामजापे भृशं प्रेरिता।
कृष्णरोलम्बशब्दायिता यूथिका।।6।।

मन्दमन्दं मनोवृष्टिसिक्ता लता।
पुष्पगर्भा स्मिता शोभते यूथिका।।7।।

ब्रह्मविज्ञाः सदा स्युः रसाप्लाविताः।
काव्यसत्पुष्प-तारांकिता यूथिका ।।8।।

वल्लरी काव्यपुष्पेव '**तारा**'कवेः।
श्वेतवर्णा यशोनिर्भरा यूथिका।।9।।

- इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-प्रतिनवबाणभट्ट- पण्डित- श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय- कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'यूथिका' नाम गजलगीतिकाव्यं सम्पूर्णम्।

# अमृतमयमुपास्यं राजते भारतं मे

## ( मालिनीवृत्तम् )

❑ डॉ. प्रीतिः पुजारा

अहमहमिकया मे भारते भूमिभागे
ऋषि-मुनि-जन देवास्तत्परा जन्म लब्धुम्।
सकलजगति दीप्तं स्वस्य कीर्तिप्रकाशै-
रमृतमयमुपास्यं राजते भारतं मे।।१।।

मधुरकुसुमकाले मोदयत्क्षुब्धचित्तं
कलकलमधुगीतैः कोकिलानां नवीनैः।
ऋतुनिचयसमेतं सम्भृतश्रीः धरायाम्
अमृतमयमुपास्यं राजते भारतं मे।।२।।

वहति तटिनी गङ्गा पुण्यतोयप्रवाहा
हिमगिरिवरशृङ्गं सैनिको यस्य शूरः।
विविधजनगणानां नीडमेकं पृथिव्या-
ममृतमयमुपास्यं राजते भारतं मे।।३।।

रिपुसबलचमूं संमर्दयत्नो **नरेन्द्रः**
प्रतिपदमिह लोके देशसेवानिमग्नः।
लसति नवविकासो यस्य नेतृत्वरीत्या
ह्यमृतमयमुपास्यं राजते भारतं मे।।४।।

विबुधगलविभूषां ज्ञानलोकस्य राज्ञीं
नवरसरुचिरां तां शारदां शुभ्रसाराम्।
मृदुलमधुरहासां सेवमानं सुरम्या-
ममृतमयमुपास्यं राजते भारतं मे।।५।।

व्रजयुवतिदुकूलं कर्षमाणस्य तीरे
त्रिभुवनसुरराज्ञो राधिकावल्लभस्य।
प्रणयभरनवीनां स्मारयत्केलिलीला-
ममृतमयमुपास्यं राजते भारतं मे।।६।।

तिलक-भगत-लालाकेसरीणां सदैव
रणभटजटिलानां मातृभूम्यै हुतानाम्।
जनजनहृदयेषु ज्वालयत्त्यागस्**जूर्णिम्**-
अमृतमयमुपास्यं राजते भारतं मे।।७।।

रघुकुलनवरीतिं रक्ष्यमाणस्य जीवैः
परशुधनुषभंकुर्जानकीवल्लभस्य।
प्रथितगुणसमेतां श्रावयत्शीलगाथा-
ममृतमयमुपास्यं राजते भारतं मे।।८।।

- सहायकाचार्यः, संस्कृतविभागः
डी.सी.एम. कला-वाणिज्य महाविद्यालयः
वीरमगाम-अहमदाबाद-गुजरातप्रान्तः
दूरभाष- ९४२८१२४५६६

# व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः

❑ डॉ.रणजीतकुमारझाः

मान्याः, जानन्त्येव भवन्तः लौकिकन्यायानां विषये व्याकरणशास्त्रे अनेकानि सूत्राणि प्रतिपादितानि सन्ति। न्यायः खलु निदर्शनात्मिका लोकप्रसिद्धिः, यस्य बलेनैव दुरवगाहं शास्त्रं सुबोधतां नीयते। लौकिकन्यायः न केवलं तेषां न्यायानामवबोधे महान् उपयोगी, अपितु व्याकरणशास्त्रस्य ग्रन्थीनाम् उन्मोचनेऽपि सहाय्यकरो भवति। लौकिकन्यायेन प्रमाणमंगीकृत्य व्याकरणशास्त्रे कतिपयप्रकरणेषु तत्र ज्ञाताज्ञात-तारतम्यं विधाय शिष्टोक्तेः अनुसारेण सर्वथा लोकोत्तरं सुबोधतां भजते।

कथ्यते यद् - **'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति'** इति सुप्रयुक्तैः साधुभिः शब्दैः पुण्यं भवति, पुण्येन च पापनिवृत्तिः, पापनिवृत्तौ च निर्मलं ज्ञानं जायते, ज्ञानेन च मोक्ष इति। एवं च व्याकरणशास्त्रमिदं शब्दसाधुत्वबोधनाय प्रवृत्तमिति निश्चप्रचम्। तेन च साधुशब्दप्रयोगेण पुण्यं, तद्द्वारा चापवर्गसिद्धिरिति क्रमः वर्तते। किन्तु सूत्राणां स्वीयोद्देश्यता-वच्छेदकावच्छेदेन प्रवृत्तिरिति नियमाद् यत्र प्रयोगे कतिपयशास्त्राणाम् उद्देश्यता तत्र कतमेन भाव्यं, कतरेण न वेति, विचिकित्सायां नियामकाभावे साधुशब्दाभिव्यक्तेः अनिष्पत्तिरिति हेतोरत्र शास्त्रे लौकिकन्यायान् आश्रित्य सूत्रेषु बाध्यबाधक-भावादिसमाश्रयेण शास्त्रलक्ष्यभूतं लक्ष्यसाधुत्वं निष्पादितं भवति।

लौकिकन्यायानां विषये अनेके कथानकाः विभिन्नेषु ग्रन्थेषु विवेचिताः वर्तन्ते। व्याकरण-शास्त्रमधिकृत्य अपि सूत्रेषु व्याख्यापूर्वकं समाकलनं दृश्यते। श्रूयते च सम्पूर्णानन्दसंस्कृतविश्वविद्यालये पूर्वं लौकिकन्यायानां विषये ग्रन्थाः प्रकाशिताः। तत्र लौकिकन्यायांजलिः, लौकिकन्यायसंग्रहः, लौकिकन्यायानामुपयोगः मुख्याः सन्ति।

वस्तुतः भगवता शब्दशास्त्रनिर्मात्रा कृतशब्दसाधुत्व-साक्षात्कारेण पाणिनिना अपि लौकिकन्यायानाम् आदरो महान् कृतः सूत्रेषु। मया अत्र केषांचन प्रसिद्धलौकिकन्यायानां संकलनं कृतं वर्तते। गृह्यसूत्रेष्वपि लौकिकन्यायपरकं वाक्यं मिलति। यथा- व्यवहारोऽपि शास्त्रवद् बलीयान्, वृद्धस्य वचनं ग्राह्यम्, ग्रामवचनं च कुर्युः इत्यादयः। 'जीवति तु वंश्ये युवा' (4.01.163) इत्यादिसूत्रेषु तत्र लिखति-अभिजनप्रबन्धो वंशः। तत्र भवो वंश्यः पित्रादिः, तस्मिन् जीवति सति पौत्रप्रभृत्यपत्यं युवसंज्ञं भवति। अर्थात् वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थ्यादि तद् युवसंज्ञमेव स्यात्। हिन्द्यां तु- पिता आदि के जीवित रहने पर पौत्रप्रभृति अपत्य युवसंज्ञक होते हैं। अर्थात् वंश में पूर्वज पिता, पितामह आदि के जीवित रहने पर पौत्र आदि के अपत्य (प्रपौत्र आदि) जो चौथी पीढी आदि में हो उनकी युवा संज्ञा होगी। इस तरह उन्हें युवाऽपत्य कहा जायेगा।

लोके हि गृहस्य कश्चन वृद्धो मृतश्चेत् तर्हि य एव कश्चन बालको वा युवा जीवन् अस्ति, तेन स प्रोच्यते साम्प्रतं भवानेव वृद्ध इत्यादिकम्। नूनमेव तस्य प्रमाणम्- **'न लोकाद् भिद्यते शास्त्रम्'** इति।

तस्माद् अत्र लौकिकन्यायानाम् आचार्यैः यत्र उपयोगः कृतः तस्य यथाशक्ति समुपबृहणं क्वचन चाकृतोपयोगानां न्यायानामुपयोगप्रदर्शनं महाभाष्ये बहुशः कृतं वर्तते। भगवता महाभाष्यकृता पतंजलिना लौकिकन्यायानुसारेण विवादस्थलेषु प्रयोगनिष्पत्तिः भावोपपत्तिश्च कृता। यावान् लौकिकन्यायाना-मुपयोगो महाभाष्ये कृतः, तावान् अन्यत्र न दृश्यते। कथं न भवेत् ...। यतो हि इदं **महाभाष्यम्**, अन्यानि भाष्याणि केवलं भाष्यमेव व्याख्यानभूतत्वात्, इदं तु महाभाष्यम्। अत एवोक्तम्- **'नहि सामर्थ्ययोगात् किंचिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'** इति।

इत्थं संस्कृतभाषायाम् अन्यत्र ग्रन्थेषु क्षेत्रीयभाषायां वा नैतादृशं लौकिकन्यायमुखेन - अभिलषितार्थसाधनं वर्तते यथा महाभाष्ये इति। **'अथ शब्दानुशासनम्'** इत्यत्रैव प्रथमप्रतिज्ञा-वाक्यम् एव- केषां शब्दानां अनुशासनम् तर्हि लौकिकानां वैदिकानां च इत्येवोक्तम्। न तु वैदिकानां लौकिकानां चेति। एवमेव सर्वत्रैव इयं प्रवृत्तिरवलोक्यते। सति सम्भवे प्रायो बहुषु विवादस्थलेषु लौकिकदृष्टान्त- आश्रयेणैव समाधानं विहितम्। क्वचित्तु शास्त्रीयसमाधानेन विवादं परिसमाप्यापि अपरितुष्यन् पुनः लोकदृष्टान्तेन समाधातुं प्रवर्तते आचार्यः। तद्यथा पस्पशाह्निके **'सिद्धे शब्दार्थसम्बन्धे'** इति प्रथम एव वार्तिके शंकासमाधानप्रसंगे बहुव्याख्यानं विधाय अपि महाभाष्यकारो वदति- 'कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति' तर्हि 'लोकतः'। यत् लोके अर्थम् उपादाय शब्दान् प्रयुंजते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत् तेषां यत्नः क्रियते। तस्मात् सिद्धः शब्दः अर्थः सम्बन्धश्चेति, इत्यत्र लोकतः निर्णयो भविष्यति इति वेद्यम्।

अथ च मया केषांचित् लौकिकन्यायानामु-पयोगः व्याकरणशास्त्रे कथं भूतः इति प्रसंगे व्याख्यायते। प्रथमः ' **उत्सर्गापवादन्यायः** ' नीयते। एवं दृश्यते यत् लोके किंचित् वस्तु सामान्येन सर्वेभ्यो दीयते किंचिच्च वस्तु विशेषरूपेण दीयते। यथा- 'क्षुधार्थेभ्यः भोजनं देयम्' 'ज्वराक्रान्तेभ्यश्च पयो देयम्' इत्युभाभ्यामपि वाक्यानां तु भोजनमेव दीयते, किन्तु ज्वराक्रान्तेभ्यश्च विशेषतया दुग्धमेव दीयते। एवमेव शास्त्रेऽपि केनचित् सामान्यशास्त्रेण सामान्यतया कार्यं सम्पाद्यते, तद्विरुद्धं केनचित् विशेषशास्त्रेण विशेषतया कार्यं सम्पाद्यते। तद्यथा- व्याकरणे **'कर्मण्यण्'** इति सूत्रेण कर्मणि उपपदे धातोः अण् प्रत्ययो विधीयते। उदाहरणं तु कुम्भं करोतीति कुम्भकारः। कुम्भ कृ अण् तथा ऋकारस्य वृद्धिः आ(र्) इति। किन्तु 'आतोऽनुपसर्गे कः' इति विशेषसूत्रेण च पूर्वसूत्रविषयतायाम् एव अनुपसर्गपूर्वकाद् आकारान्ताद् धातोः 'क' प्रत्ययो विधीयते। इदं तु तत्र अणोऽपवादशास्त्रम्।

भाष्ये तु अयं न्यायः पस्पशाह्निके 'शब्दाः कथं प्रतिपत्तव्याः' इति विचारप्रसंगे व्याख्यातः। तथा च भाष्यम्- 'कथं तर्हि इमे शब्दाः प्रतिपत्तव्याः इति प्रश्ने कथयति, किंचित् सामान्यविशेषवत् लक्षणं प्रवक्तव्यम्। येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्। उत्सर्गापवादौ। कश्चिद् उत्सर्गः कर्त्तव्यः। कश्चिद् अपवादः। कथं जातीयकः पुनरुत्सर्गः कर्त्तव्यः, कथं जातीयकोऽपवादः इति प्रश्ने, सामान्येन उत्सर्गः कर्त्तव्यः। तद्यथा-कर्मण्यण्। तस्य विशेषेणापवादः कर्त्तव्यः। तद्यथा-आतोऽनुपसर्गे कः इति।

द्वितीयो लौकिकन्यायः

'**शिष्टानुकरणन्यायः**'। यथा लोके कश्चिद् आप्तजनो दानं करोति, ब्राह्मणान् भोजयति, ईश्वरं भजति, गुरून् सेवते, यदा तस्यानुकुर्वन् अन्येऽपि तथैवाचरन्ति, गीतायामपि-

**यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥**

अत्राऽपि इतरः प्राकृतो जनोऽपि तत्तदेव आचरति, स श्रेष्ठो जनः कर्म्मशास्त्रं प्रवृत्तिशास्त्रं निवृत्तिशास्त्रं वा यत्प्रमाणं मन्यते, तदेव लोकोऽपि अनुसरति। निश्चप्रचमेव तदा सोऽभ्युदयेन युज्यते। यत् कर्म न केनापि शिष्टेनाचरितम्, नापि शास्त्रेण निषिध्यते, तस्य कर्मणः करणेनापि किंचित् पुण्यं नापि दोष एव। एवमेव तदनुकरणेऽपि पुण्यपापयोः अभावः। तथैव यदि शिष्टोच्चारितस्य अनुकरणं स्यात् तदा तद् अभ्युदयाय भवितुमर्हति,

न्यायोऽयं भाष्ये **ऋलृक्** सूत्रे लृकारोपदेशस्य प्रयोजनानि अन्वाख्यानप्रसंगे अशक्ति-जानुकरणोच्चारि-लृकारसाधुत्वार्थमपि तदुपदेशस्य प्रयोजनं नास्ति इति निरूपणावसरे प्रयुक्तः। तथा च भाष्यम्- 'अनुकरणं हि शिष्टस्य साधु भवति, अशिष्टप्रतिषिद्धस्य वा नैव तद्दोषाय भवति, नाभ्युदयाय। यथा लौकिकवैदिकेषु। लोके तावद्- य एवम् असौ ददाति, य एवम् असौ यजते, य एवं असावधीते इति। तस्यानुकर्वन् दद्यात्, यजेत्, चाधीयेत चेत् सोऽपि अभ्युदयेन युज्यते इति।..................

तृतीयस्तु '**काकाधिकरणन्यायः**' इति प्रस्तौमि। यथा लोके कश्चिज्जनः देवदत्तस्य गृहमन्विष्यन् कस्मिंश्चद् ग्रामे गतवान्। तत्र गत्वा स कंचित् जनं पृच्छति.. देवदत्तस्य गृहं जानाति किम् ? तत्र दर्शयति स संकेतमाध्यमेन.......तत् देवदत्तस्य गृहम्। तत्र द्वयोः गृहयोः तुल्यमेव स्वरूपम् .इति दृष्ट्वा सन्दिहानः पुनः कंचित् जनम् अपृच्छत् ....अनयोः कतरद्देवदत्तस्य गृहम् ? ततोऽभिज्ञो वदति यस्य गृहस्योपरि काकस्तिष्ठति तदेव देवदत्तस्य गृहम्। अथ च यथा ईदृशस्थले चंचलयाऽपि काकस्थित्या स्थिरस्य गृहस्य पार्थक्येन परिचयो दीयते, तथैव पाणिनीयशब्दशास्त्रेऽपि निवर्तमानेन अपि अनुबन्धेन प्रत्ययाः पृथक्कृत्य ज्ञायन्ते।

न्यायोऽयं 'क्तक्तवतू निष्ठा' (पा0 1.01.25) सूत्रमहाभाष्ये व्याख्यातः। क्तश्च क्तवतुश्च क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः। कृतः। कृतवान्। भुक्तः। भुक्तवान्। ककारः कित्कार्यार्थः। उकारः उगित्कार्यार्थः। निष्ठाप्रदेशस्य- 'श्वीदितो निष्ठायाम्' इत्यत्र चर्चा कृता वर्तते। प्रकृतसूत्रेण यथा 'कृत' इत्यत्र क्त प्रत्ययस्य निष्ठा संज्ञा क्रियते, तथैव 'गर्त' इत्यत्रापि तकारस्य निष्ठा संज्ञा स्यात्। सर्वत्र अनुबन्धानां निवर्त्यमानत्वेन उभयत्रापि तकारयोः आनुपूर्व्याम् अविशेषादिति। अथ **क्त** इत्यत्र ककारोऽनुबन्धः इति अनुबन्धकृतभेदाश्रयणात् नात्र निष्ठासंज्ञा प्राप्तिरिति तद्वारणार्थं कश्चित् प्रयासो नैव विधेयः। अयमेव यथा ध्रुवस्य काकस्य उड्डयनात् परं देवदत्तस्य गृहम् अज्ञातं भवति, 'काकवन्तो देवदत्तस्य गृहाः' न्यायवत् यत्र अध्रुवेण अनुबन्धेन ध्रुवस्य प्रतीतिर्जायते। अध्रुवेण निमित्तेन देवदत्तस्य गृहं यथा। इति कारिकायामपि अस्य न्यायस्य गतिः वर्तते। वस्तुतः अनुबन्धयोः लोपे अविशिष्ट-प्रत्ययानाम् आनुपूर्व्याम् अविशेषात्तद् भेदः कर्तुं न शक्यत इति आशंक्य साम्प्रतिकाभावे

भूतपूर्वगतिरिति न्यायं मनसि निधाय समाहितं यद् यद्यपि काकस्थिते अध्रुवत्वाद् उड्डिते काके देवदत्तस्य गृहम् इदानीम् अज्ञातम् इव प्रतीयते, तथापि पूर्वमत्र काक आसीद् इदानीमपि ज्ञायत एव। अथापि संशयो भवत्येवेति तन्निराकरणार्थं भूतकालविशिष्टे कर्त्तरि कर्मणि भावे वा विधीयमानः 'क्त' प्रत्ययो निष्ठासंज्ञो भवति इति अध्रुवेणानुबन्धेन ध्रुवस्य कारककाल-विशेषस्य ध्रुवस्य व्यावर्तकत्वम् अंगीकृत्य निष्ठासंज्ञाया अतिव्याप्तिर्निराकृता वर्तते। तथा च भाष्ये- अनुबन्ध इति चेत्, तन्न। किं कारणम्? लोपात्। लुप्यते अत्रानुबन्धः। लुप्ते चानुबन्धे न अन्यत्वं भवति। तद्यथा कतरद्देवदत्तस्य गृहम्? अदः यत्रासौ काक इति। उत्पतिते काके नष्टं तद्गृहं भवति किम्। एवमिहापि लुप्ते अनुबन्धे नष्टप्रत्ययो भवति किम्। नैव खलु।

चतुर्थश्च '**अभ्रचन्द्रन्यायः**' इति। अर्थात् अभ्रे चन्द्रं पश्येति न्यायः। यथा लोके कश्चन भ्रान्तः पथिकः कंचित् पृच्छति- 'भवान् मां पन्थानम् उपदिशतु। ततस्तेनोच्यते- 'कूपे हस्तदक्षिणः पन्थाः'। तत्र कूपस्य पथः ज्ञापकत्वमेव, न तु पथो निर्माणे जनकत्वम्। अयमेव अपि यथा '**अभ्रे चन्द्रमसं पश्य**' इत्यत्र अभ्रस्यापि चन्द्रदर्शने हेतुत्वम्, न तु चन्द्रमसो दर्शनीयत्वे कारणत्वं वर्तते। एवमेव व्याकरणशास्त्रे अपि यस्मिन् अर्थे प्रतीयमाने येन सूत्रेण यत्कार्यं विधीयते, सोऽर्थः तत्कार्यं प्रति निमित्तम्, न तु तस्य कार्यस्य अर्थः।

अतएव 'चार्थे द्वन्द्वः' इति सूत्रेण विधीयमान-द्वन्द्वसमासं प्रति च अर्थो निमित्तमेव, न तु द्वन्द्वसमासस्य अर्थो वर्तते। एवमेव 'अनेकमन्य-पदार्थे' इति सूत्रेण विधीयमानबहुव्रीहिसमासं प्रति अन्यपदार्थस्य निमित्तत्वमेव, अत्र न तु समासार्थत्वम् इति। न्यायोऽयं '**समर्थः पदविधिः**' इति सूत्रमहाभाष्ये प्रयुक्तः। यद्यपि परिभाषासूत्रमिदम्। **अस्यार्थः**- यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थो वेदितव्यः। विधीयत इति विधिः, पदानां विधिः पदविधिः, स पुनः समासादिः। समर्थः शक्तः। विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः। अथवा समर्थपदाश्रयत्वात् समर्थः। समर्थानां पदानां सम्बद्धार्थानां विधिः वेदितव्यः।

तत्रायमवसरः- द्वन्द्वे चार्थाभिधानम्, बहुव्रीहौ तु अन्यपदार्थाभिधानं वा वाचनिकम्, उत स्वाभाविकम्। यदि वाचनिकं तदा असत्येकार्थीभावे चार्थे द्वन्द्वविधानाद् द्वन्द्वेनैव च अर्थस्य उक्तत्वात्, अन्यथा सिद्धत्वाच्च अस्य प्रयोगत्वाद् एकार्थीभावानुमानं न स्यात्। यदि च स्वाभाविकं तदा 'चार्थे' इत्यादि अर्थनिर्देशो निरर्थकः। ततश्च 'चार्थे द्वन्द्वः' इत्यादिसूत्रेणैव अर्थादेशनं क्रियते, किन्तु स्वभावतश्च अर्थादिष्वर्थेषु एतेषां शब्दानां शक्तिः भवत्येव। वस्तुतः सूत्राणि तु केवलं तदर्थलक्षकानि भवन्ति। अत एव यद् अन्यपदार्थे अनेकं वर्तते, तद् बहुव्रीहिसंज्ञकम् इत्यर्थः 'अनेकमन्यपदार्थे' इति सूत्रस्य सम्पद्यते। तथा च तत्रत्यं भाष्यम्- '**न एतानि अर्थादेशनानि। स्वभावत एतेषां शब्दानाम् एतेषु अर्थेषु अभिनिविष्टानां निमित्तत्वेन अन्वाख्यानं क्रियते**। तद्यथा- 'कूपे हस्तदक्षिणः पन्थाः, अभ्रे चन्द्रमसं पश्य' इति, स्वभावतः तस्य तत्रस्थस्य पथःचन्द्रमसश्च निमित्तत्वेन अन्वाख्यानं क्रियते। एवम् इहापि चार्थे य स द्वन्द्वः, अन्यपदार्थे यः स बहुव्रीहीति' तर्हि अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यते, द्वन्द्वसंज्ञश्च समासो भवति। अनेकं सुबन्तं

अन्यपदार्थे वर्तमानं समस्यते, बहुव्रीहिश्च समासो भवति। अत्र प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति।

पंचमश्च **'वृद्धकुमारीवरन्यायः,** अथवा **वृद्धकुमारीवाक्यवद् न्यायः**। (इस प्रकार का वरदान मांगना, जिसमें सभी बातें आ जाये जो एक व्यक्ति चाहता है।) कथ्यते यत् कदाचित्पूर्वं काचिद् वृद्धा कुमारी तपसा इन्द्रं तोषितवती, तदा प्रसन्नश्चेन्द्रः तं 'वरं वृणीष्व' इति प्रोवाच। सा च वृद्धा कुमारी इत्थं वरं याचितवती- 'पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुंजीरन्' इति। अत्र यथा वृद्धकुमार्य्या एकेनैव वाक्येन सर्वमपि भौतिकं सुखभोगसाधनं याचितम्, तथैव शास्त्रेऽपि यत्र एकेनैव सूत्रेण केनापि वाक्येन वा अनेके अर्थाः उपलभ्यन्ते, अनेकानि कार्याणि वा क्रियन्ते, तत्रायं न्यायो दृष्टान्तमुखेन व्यवह्रियते।

अस्य न्यायस्य क्षेत्रं 'न मु ने' इति भाष्ये (पा. 08.02.03) दृश्यते। तत्र - 'अदस्' शब्दात् तृतीयैकवचने 'अमुना' इति प्रयोगो निष्पाद्यते। तत्र च इत्थं प्रक्रिया प्रवर्तते- अदस् शब्दात् टा इत्यवस्थायाम् अदसोऽसेर्दादु दो मः (पा. 08.02.80) इति सूत्रेण उत्वमत्वयोः कृतयोः घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' (पा. 7.03.120) इति सूत्रेण टाप्रत्ययस्य स्थाने नादेशे कर्त्तव्ये नादेशविधायकस्य सूत्रस्य सपादसप्ताध्यायीस्थत्वात् तद्दृष्ट्या उत्वमत्वविधायकसूत्रस्य त्रिपादीस्थत्वे सिद्धत्वे घिसंज्ञाया अभावे नाभावो न स्यादिति शंकायां महर्षिणा पाणिनिना 'न मु ने'' इति सूत्रेण नाभावे कर्त्तव्ये कृते च मुत्वस्य असिद्धिर्वारिता। ततो भाष्ये शंकितं यत् 'न मु ने' इत्यत्र परार्थिका सप्तमी स्वीक्रियते चेत्, नाभावे कृते मुत्वस्य सिद्धत्वेऽपि कर्त्तव्ये असिद्धत्वाद् घिसंज्ञाया अभावे नादेश एव न स्यादिति।

तस्मिन् ने-परतः कथं मुत्वस्य सिद्धिरुच्यत इति। ततो 'न मु ने' इति सूत्रेण ने परतो असिद्धत्वप्रतिषेधेन आचार्यस्याभिप्रायो लक्ष्यते- यत् नादेशे कर्त्तव्ये अपि मुत्वस्य असित्वबोधनेन नादेशो भवत्येव। भाष्यकारस्य इयं शैली प्रायः सर्वत्र परिलक्ष्यते यत् शास्त्रयुक्त्या निराकृतस्यापि दोषस्य लौकिकदृष्टान्तेन सरलया पद्धत्या पुनर्निराकरणं विदधाति। तथा च भाष्यम्- **'अथवा द्विगता अपि हेतवो भवन्ति**। तद्यथा-आम्राश्च सिक्ताः , पितरश्च प्रीणिता भवन्ति। तथा वाक्यानि अपि द्विगतानि दृश्यन्ते- श्वेतो धावति, अलंबुसानां यातेति, अथवा वृद्धकुमारीवाक्यमिदं द्रष्टव्यम्। तद्यथा- वृद्धकुमारी इन्द्रेण उक्ता 'वरं वृणीष्व' इति, सा वरम् अवृणीत- **'पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुंजीरन्'** इति। (अर्थात् मेरे पुत्र सोने की थाली में घी दूध युक्त भात खायें। एक ही वरदान में बुढ़िया ने पति, पुत्र, धनधान्य, पशु, सोना, चाँदी सब कुछ मांग लिया। एक वाक्य से सब कुछ मांग लिया जाए वहाँ इस न्याय का प्रयोग होता है।)

- सहायकाचार्यः
राजकीय शास्त्री संस्कृत महाविद्यालयः,
कालाडेरा, जयपुरम्।
मो. 9414480988, 9314467988

# भट्टिमहाकाव्यस्य व्याकरणदृष्ट्याऽनुशीलनम्

❑ सोनु देवी

शास्त्रकाव्येषु भट्टिकाव्यस्य नितरां प्रसिद्धिः विद्यते। एतत् काव्यं भट्टिस्वामिना विरचितमस्ति। तस्य नाम्नैव काव्यमेतत् 'भट्टिकाव्य'मिति प्रसिद्धिमगात्। एतत् काव्यं 'रावणवध' नाम्ना अपि विज्ञायते। कविरयं संस्कृतवाङ्मये एकस्या अद्भुतकाव्यधारायाः प्रवर्तको मन्यते, यत्र काव्यस्य कमनीयता ललितकोमलकान्तपदावलिः, रससौष्ठवम्, अलंकारमाधुर्यम् इत्यादितत्त्वानां मनोरमः समन्वयः दृष्टिपथमायाति।

काव्यमिदं रावणवधमिति, तथापि कवेः नाम्ना भट्टिकाव्यरूपेण प्रसिद्धिमवाप्य रघुवंश-किरातार्जुनीय-शिशुपालवध-नैषधीयचरितप्रभृति-काव्यानां महिमानमभजत् काव्यरसज्ञानां कण्ठहारतां चोपागच्छत्।

अस्य महाकाव्यस्योत्कर्षः महाकाव्यलक्षणपुरस्सरं काव्यशास्त्रस्य किञ्च सर्वशास्त्राणां मुखभूतस्य व्याकरणस्यापि सुगमत्वं साधयति। यथा खलु वैद्यः रोगोपशमनार्थं कटुकौषधं प्रदातुं मधुरां सितां मेलयति, तथैव एष महाकविः किञ्चित् कठिनतया अवगम्यमानं व्याकरणं शिक्षयितुं रसभावभरितरामकथामाध्यमेन महाकाव्यमिदं रचयामास।

सर्वप्रथमं महाकविभट्टेः **परिचयः** संक्षेपेणात्र प्रस्तूयते-

महाकवेरस्य जन्म सौराष्ट्रप्रदेशे ईशवीय-**षष्ठशताब्द्याम**भूदिति मन्यते। वलभीस्थानस्य राज्ञः श्रीधरसेनस्याश्रयमवाप्य महाकाव्यमिदं रचितवानिति महाकविर्भट्टिः स्वयमेव लिखति -

**काव्यमिदं विहितं मया वलभ्यां**
**श्रीधरसेननरेन्द्रपालितायाम्।**
**कीर्तिरतो भवतान्नृपस्य तस्य**
**प्रेमकरः क्षितिपो यतः प्रजानाम्**[1]।।

अतस्य 'रावणवधमहाकाव्यम्' इति रचनेयं भट्टिकाव्यनाम्ना एव प्रसिद्धिमभजत्।

अस्य महाकाव्यस्य उपजीव्यं रामायणमस्ति। यत्र रामस्य जन्मनः प्रभृति रावणहननपर्यन्तं रामायणकथा उपवर्णितास्ति। अत्र मुख्यो रसः वीररसः, गुण ओजः, गौडी रीतिः, सात्वती वृत्तिश्च मुख्यरूपेण ज्ञातव्याः सन्ति।

महाकाव्यमिदं संस्कृतवाङ्मयस्य प्रसिद्धपरम्परा-द्वयस्य रामायणकथायाः पाणिनीयव्याकरणस्य च मिश्ररूपत्वात् कलाविज्ञानयोः सम्मिश्रणमिव प्रतिभाति। अतएव महाकविना स्वरचनागौरवं प्रकटयता प्रतिपादितं यत्तस्येदं महाकाव्यं व्याकरण-ज्ञानविहीनानां पाठकानां कृते नास्ति। एतत् काव्यं टीकामाश्रित्यैवावगन्तुं शक्यते। एतत् काव्यं विदुषां मनोविनोदाय छात्राणां प्रायोगिकपद्धत्या व्याकरणस्य दुरूहनियमानाम् अवबोधार्थं रचितमस्ति।

महाकाव्यस्यास्य वैशिष्ट्यमिदमस्ति यत् महाकाव्यस्य लक्षणानुगुणं रचितमप्येतत् काव्यं व्याकरणशिक्षां प्रददाति। अतएवोक्तं स्वयं महाकविना भट्टिना -

**दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।**
**हस्तादर्श इवान्धानां भवेद् व्याकरणादृते**[2]।।

काव्यस्यास्य विषयवस्तुनः वर्गीकरणं द्विधा भवितुं शक्नोति - काण्डदिशा वर्गीकरणं सर्गदिशा वर्गीकरणञ्च।

महाकाव्यस्यास्य द्वाविंशतिसर्गाः चतुर्षु काण्डेषु विभक्ताः सन्ति।

1- प्रकीर्णकाण्डम्- प्रथमसर्गतः पंचमसर्गपर्यन्तम्। अत्र रामजन्म,सीताविवाहः, रामस्य वनगमनम्, सीताहरणञ्च, सीतान्वेषणाय कृत उपक्रमः

वर्णितोऽस्ति।

2-अधिकारकाण्डम्- षष्ठसर्गतः नवमसर्गपर्यन्तम्। अत्र सुग्रीवस्य राज्याभिषेकः,वानरभटैः सीतान्वेषणम्, अशोकवाटिकाभङ्गः, हनुमन्तं निगृह्य रावणसभाया-मुपस्थापनञ्च।

3- प्रसन्नकाण्डम्- दशमसर्गतः त्रयोदशसर्गपर्यन्तम्। चतुर्षु सर्गेषु सीतायाः अभिज्ञानप्रदर्शनम्, लंकायां प्रभातवर्णनम्,विभीषणस्य रामसमीपे आगमनम्, सेतुबन्धस्य कथा इत्येतत्सर्वं वर्णितमस्ति।

4- तिङन्तकाण्डम्- चतुर्दशसर्गतः द्वाविंशति-सर्गपर्यन्तम्। नवसर्गेषु शरबन्धमारभ्य रामस्य अयोध्यायां प्रत्यागमनपर्यन्तं कथाभागो वर्णितोऽस्ति।

इदानीं सर्वप्रथमं समासादीनां संक्षिप्तपरिचयः प्रस्तूयते-

**समासः -**

सम् उपसर्गपूर्वकात् अस् धातोः घञ् प्रत्यये कृते निष्पन्नस्य 'समास' शब्दस्य सामान्योऽर्थः योगः,संक्षेपः एकीकरणम् इत्यादिरूपेण मन्यते।

**कृदन्तप्रत्ययाः -**

धातुभिः सह यानि पदानि योजयित्वा संज्ञा - विशेषण- अव्ययपदानि निर्मीयन्ते ते प्रत्ययाः कथ्यन्ते। कृत्प्रत्यययुक्तानि पदानि कृदन्त- (कृत् अस्ति अन्ते यस्य तत् कृदन्तम्) पदानि भवन्ति। कृदन्तपदानां (संज्ञा-विशेषणपदानां) रूपाणि सर्वासु विभक्तिषु सर्वेषु च वचनेषु शब्दस्वरूपवद् भवन्ति, यानि च कृदन्त- अव्ययपदानि भवन्ति तान्येकरूपतयैव तिष्ठन्ति। यथा -

रामः रावणं हतवान्।रामेण रावणः हतः।स गतः।

मया पठनीयम्।

समेऽपि कृत्प्रत्ययाः त्रिधा भवन्ति -

1- कृत्यप्रत्ययाः, 2- कृत्प्रत्ययाः, 3- उणादिप्रत्ययाः।

1- कृत्यप्रत्ययाः -

**तव्यञ्च तव्यतञ्चैवानीयर्-केलिमरौ तथा।**
**यतं ण्यतं क्यपञ्चापि कृत्यान् सप्त प्रचक्षते।।**

कृत्प्रत्ययाः - सप्त भवन्ति- तव्यत्, तव्य, अनीयर्, केलिमर्, यत्, क्यप्, ण्यत्।

मुख्यत एभिः प्रत्ययैः विध्यर्थः प्रकटीभवति।यथा-

मया पुस्तकं पठितव्यम्।

कृत्यप्रत्ययानां प्रयोगः प्रायेण सकर्मकधातुभिर्योगे कर्मवाच्ये क्रियते। अकर्मकधातुभिर्योगे तु भाववाच्ये क्रियते।

यथा - भृत्येन स्वामी सेवनीयः।

मया गन्तव्यम्।

कृत्यप्रत्ययान्तस्य कर्तरि तृतीया षष्ठी वा प्रयुज्यते। यथा- मम मया वा पिता पूज्यः।

कृत्यप्रत्ययाः विभिन्नेष्वर्थेषु प्रयुज्यन्ते। एतेषां प्रयोगः संज्ञायाः विशेषणरूपेणापि क्रियते।

यथा- पचनीयाः माषाः, गन्तव्या नगरी, पठनीयं पुस्तकम्।

कृत्यप्रत्यययुक्ताः शब्दाः त्रिष्वपि लिङ्गेषु भवन्ति।

पुंल्लिङ्गे रामवत्, नपुंसकलिङ्गे फलवत्, स्त्रीलिङ्गे च रमावत् भवन्ति।

उदाहरणार्थं भट्टिकाव्यस्थाः कतिचन प्रयोगा अत्र प्रस्तूयन्ते -

| धातुः | प्रत्ययः- तव्यत्, | अनीयर् |
|---|---|---|
| कृ | कर्तव्यः | करणीयः |

**प्रष्टव्यं पृच्छतस्तस्य कथनीयमवीवचत्।**
**आत्मानं वनवासं च जेयं चाऽरिं रघूत्तमः[३]।।**

| धातुः | प्रत्ययः | प्रयोगः |
|---|---|---|
| जि | यत् | जेयम् |

| | | |
|---|---|---|
| प्रच्छ् | तव्यत् | प्रष्टव्यम् |

**लभ्या कथं नु वैदेही शक्यो द्रष्टुं कथं रिपुः।**
**सह्यः कथं वियोगश्च गद्यमेतत्त्वया मम[४]।।**

| | | |
|---|---|---|
| छिद् | केलिमर् | छिदेलिमः |
| भृ | क्यप् | भृत्यः |

**आदृत्यस्तेन वृत्येन स्तुत्यो जुष्येण संगतः।**
**इत्यःशिष्येण गुरुवद् गुह्यमर्थमपास्यसि[५]।।**

| | | |
|---|---|---|
| भृ | ण्यत् | भार्या |

धातुभिर्योगेन शब्दनिर्मापकाः तिङ्भिन्ना प्रत्ययाः कृत्-प्रत्ययाः कथ्यन्ते। तेषु कृत्यप्रत्ययानां उणादिप्रत्ययानाञ्च अवान्तरविभागोऽपि।

**भूतकालिककृत्-प्रत्ययाः -**

| | | |
|---|---|---|
| कृ | क्त | कृतः |
| कृ | क्तवतु | कृतवान् |
| कृ | क्वसु | चक्रवस् |
| वच् | क्त | उक्तः |
| वच् | क्तवतु | उक्तवान् |
| वच् | क्वसु | ऊचिवस् |

वर्तमानकालिककृत्-प्रत्ययाः -

| | | |
|---|---|---|
| कथ् | शतृ | कथयत् |
| कथ् | शानच् | कथयमाणः |

**भविष्यत्कालिककृत्-प्रत्ययाः -**

| | | |
|---|---|---|
| कृ | स्य+तृ | करिष्यत् |
| कृ | स्य+मान | करिष्यमाणः |

**पूर्वकालिककृत्-प्रत्ययाः -**

| | | |
|---|---|---|
| गम् | क्त्वा | गत्वा |
| उप+गम् | ल्यप् | उपगम्य |

**भावार्थ-कृत्-प्रत्ययाः -**

| | | |
|---|---|---|
| भू | घञ् | भावः |

**कर्तृवाचक-कृत्-प्रत्ययाः -**

| | | |
|---|---|---|
| भिद् | ण्वुल् | भेदकः |
| पठ् | तृच् | पठिता |

**उणादि-प्रत्ययाः -**

अनेके सन्ति उणादिप्रत्ययाः प्रयोगश्चैतेषां भिन्नेष्वर्थेषु भवति। वस्तुतः संस्कृते येषां शब्दानां सिद्धिः कैश्चिदप्यन्यैः प्रत्ययैः न सम्भवति तेषां सिद्धिः उणादिप्रत्ययैः क्रियते। एतेषां प्रत्ययानां प्रयोगः दुष्करोऽस्ति, अतः सावधानतया कर्तव्यः। उदाहरणार्थं द्रष्टव्यमेतत् -

उणप्रत्ययः - करोतीति कारुः। वातीति वायुः।

**सख्यस्य तव सुग्रीवः कारकः कपिनन्दनः।**
**दूतं द्रष्टाऽसि मैथिल्याः सैवमुक्त्वा तिरोऽभवत्[६]।।**

अस्मिन् महाकाव्ये 10 गणैः 10 लकारैश्च सह आत्मनेपद-परस्मैपद-षत्व-णत्व-सन्नन्तप्रयोगाः पाणिनीयसूत्रक्रमेणैव प्रयुक्तास्सन्ति। इत्थमस्य महाकाव्यस्य वैलक्षण्यं विलोक्य सुधियो विद्वांसः जिज्ञासवो विद्यार्थिनश्च लाभान्विता जायन्ते।

।। इति शम् ।।

- शोधच्छात्रा ( व्याकरण विभागे )
जगद्गुरु रामानंदाचार्य राजस्थान संस्कृत विश्वविद्यालयः, मदाऊ, भांकरोटा, जयपुरम्, राजस्थानम्

**सन्दर्भः**

१. भट्टिकाव्यम, सर्ग २२, श्लोक ३५
२. तदेव, २२/२३
३. भट्टिकाव्यम, सर्ग ०६, श्लोक ४७
४. भट्टिकाव्यम, सर्ग ०६, श्लोक ४८
५. भट्टिकाव्यम, सर्ग ०६, श्लोक ५५
६. भट्टिकाव्यम, सर्ग ०६, श्लोक ७२

# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

दूरभाषसङ्ख्या – 011-28524993, 28524995, 28520979, 28520966

अन्तर्जालपुटम् - www.sanskrit.nic.in


अधिसूचनायाः संख्या - के.सं.वि./36014/विज्ञापनम्/एस्-III/2023-24/01 दिनाङ्कः – 07/07/2023

## 2023-24 वित्तीयवर्षे संस्कृतसंवर्धनयोजनाः उपलक्ष्य वित्तीयसहायतायाः प्रदानार्थम् अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य निम्नलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2023-24 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः स्वैच्छिकसङ्घटनैः/संस्थाभिः/विश्वविद्यालयैः/प्रकाशकैः/वैयक्तिकरूपेण/छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1 | संस्कृतशिक्षणम् - पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु/सर्वकारीयविद्यालयेषु/चतुष्पाठीसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयाध्यापकानां मानदेयं तथा आदर्शविद्यार्थिछात्रवृत्तिश्च । | 10.07.2023 | 08.09.2023 |
| 2 | सम्मानराशिः - अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः । | | |
| 3 | संस्कृतसंवर्धनाय कार्यक्रमाः एवं गतिविधयः - विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता । | | |
| 4 | संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च | | |
| 5 | शास्त्रचूडामणिः - संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः । | | |
| 6 | व्यावसायिकप्रशिक्षणम् - पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम् । | | |
| 7 | अष्टादशी - संस्कृतसंवर्धनाय अष्टादशपरियोजनाः । (निर्धारितक्षेत्रेषु एव आवेदनीयम्) | | |
| 8 | छात्रवृत्तिः - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/पालि/प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः । | 10.07.2023 | 31.10.2022 |

उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते । अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते । परन्तु प्रत्येकं योजनायाः दिशानिर्देशानुसारं प्रमाणपत्राणि/पुस्तकानि/अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितानि अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथक्रूपेण पञ्जीकृतपत्रालयमाध्यमेन (Registered Post 20.09.2023 दिनाङ्काभ्यन्तरे "निदेशकः (केन्द्रीययोजनाः), (.....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058" इति पत्रसङ्केतं प्रति प्रेषणीयानि भवन्ति । आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः । प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकताः, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य प्रपूरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटं www.sanskrit.nic.in/schemes अवलोकयन्तु । योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतायाः प्राप्त्यर्थं प्रतिवर्षं पृथक्रूपेण आवेदनं करणीयम् । आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति । कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा समस्यानिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेन वा सम्पर्कयितुं शक्नुवन्ति ।

हस्ता/-

निदेशकः (केन्द्रीययोजनाः)

पुस्तक-समीक्षा

# स्वातन्त्र्यसङ्ग्रामे संस्कृतसेवकाः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

भारतस्य सुदीर्घे स्वातन्त्र्यसङ्ग्रामे संस्कृतस्य विदुषां, कवीनां, लेखकानां संस्कृतसेवकानां चापि सुविपुलं योगदानमासीदिति तथ्यं सुतरामुल्लेखनीयमस्ति। विषयमिममादाय सुप्रथितेन विदुषा केन्द्रीय-संस्कृतविश्वविद्यालयस्य भोपालपरिसर-निदेशक-पदमलङ्कुर्वता प्रो. रमाकान्तपाण्डेयेन यो ग्रन्थो व्यलेख्यत तस्य प्रकाशनं स्वयं केन्द्रीयसंस्कृत-विश्वविद्यालयेन नवदेहलीस्थेन विहितमस्तीति प्रमोदास्पदम्। ग्रन्थोऽयं खण्डचतुष्टये विभाजि-तोऽस्ति, यस्य नामकरणं प्रथमा क्रान्तिः, द्वितीया क्रान्तिः इत्याद्यभिधानैः क्रान्तिचतुष्टयं सूचयता लेखकेन कृतमस्ति।

प्रथमे खण्डे तस्य प्रसङ्गस्य विवरणमस्ति यत् कथं मैकाले- निर्दिष्टाया नीतेरनुसरणेन कोलकाता- दिनगरेषु संस्कृतविद्यालयानामुपरि संकटापादन-मभूद् यस्य विरोधे विद्वद्भिः एच.एच.विलसन-महोदयाय छन्दोबद्धानां पत्राणां लेखनं कृतमस्ति। द्वितीये खण्डे तेषां संस्कृतविदुषां विवरणमस्ति, दयानन्द सरस्वती, बालगङ्गाधरतिलक, सावरकर, क्षेत्रेशचन्द्रचट्टोपाध्याय, चन्द्रशेखर आजाद, भगतसिंह प्रभृतिभिर्यैः विभिन्नैः स्वरूपैःस्वातन्त्र्य- सङ्ग्रामे प्रत्यक्षमप्रत्यक्षं वा योगदानं व्यधायि। अत्र पन्नालाल जोशी-हीरालालशास्त्री-लादूराम जोशी-गिरिराज शास्त्री इत्यादीनां राजस्थानीयानामपि विवरणमस्ति। तृतीये खण्डे आङ्ग्लशासनस्य विरोधे विरचितस्य संस्कृतसाहित्यस्य प्रणेतॄणां विवरणमस्ति यैः प्रत्यक्षरूपेण परोक्षरूपेण वा स्वरचनासु वैदेशिकशासनस्य विरोधः कृतोऽभूत्। भगवदाचार्याणां गान्धिजीवनमाधृत्य लिखितं काव्य-त्रयं, रामावतारशर्मणो भारतगीतिका, अम्बिका-दत्तव्यासस्य शिवराजविजयः महर्षेररविन्दस्य 'भवानी भारती' पण्डिता क्षमारावमहोदयायाः सत्याग्रहगीतादीनि काव्यानि, मथुराप्रसाददीक्षितस्य भारतविजयनाटकम् इत्यादयो रचनाः स्वातन्त्र्य-सङ्ग्रामस्य सर्वात्मना समर्थनमकार्षुः।

चतुर्थखण्डे संस्कृतपत्रकारितायाः स्वातन्त्र्य-सङ्ग्रामसमर्थनमाधृत्य संस्कृतपत्रिकासु प्रकाशितेन साहित्येन कथं तत्र योगदानं कृतमिति वर्णितमस्ति। अप्पाशास्त्री राशिवडेकरस्य कविता 'पञ्जरबद्धः शुकः' प्रसङ्गेऽस्मिन् सुप्रथिताऽस्ति, सा ह्यत्र पूर्णतः समुद्धृता। एवंविधाः काव्यरचना अत्र पठितुं शक्यन्ते। रामाचार्यगलगलीवर्याणां श्रीस्वराज्यरत्न-करकाव्यात् स्वदेशीयलहरी, गान्धीटोपीलहरी चेत्यादिकाव्यरचना अत्र मुद्रिताः।

इत्थं स्वातन्त्र्यसङ्ग्रामे संस्कृतसेवकानां योगदानस्येतिहासं विवृण्वन्नयं ग्रन्थः सर्वथा समादरणीय एव। एतस्य प्रधानसम्पादकोऽस्ति केन्द्रीयसंस्कृतविश्वविद्यालय कुलपतिः प्रो. **श्रीनिवास बरखेडी** यस्य पुरोवाक् प्रारम्भे मुद्रिताऽस्ति।

स्वाधीनतासङ्ग्रामवीराः संस्कृतोपासकाः, लेखकः प्रो. **रमाकान्त पाण्डेयः**, प्रकाशकः केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिक क्षेत्रम्, जनकपुरी, नई दिल्ली, पृ.सं. 140, मूल्यम् 180/-

# अभिनवगुप्तस्य स्तोत्राणि

सुप्रथितः काव्यशास्त्री ध्वन्यालोके लोचनटीकाकारः श्रीमान् अभिनवगुप्तः केवलमलङ्कारशास्त्री एव नाऽऽसीत्, स शैवागमस्य मूर्धन्य आचार्यो, ग्रन्थकारः स्तोत्रकारश्चाप्यासीत् इति तथ्यं सुविदितमागमसाहित्येतिहासे। आचार्यस्या-भिनवगुप्तस्य दशस्तोत्राणां सुविस्तृता टीका,

हिन्द्यामनुवादश्च सुपरिचितेन विद्वत्प्रवरेण केन्द्रीयसंस्कृतविश्वविद्यालयीय-भोपालपरिसर-निदेशकेन प्रो.रमाकान्तपाण्डेयेन विरचितोऽस्ति यः सपद्येव प्रकाशमासः।

अत्र हि आचार्याभिनवगुप्तस्य दशस्तोत्राणि 'विमर्श' पदाभिधेयया भाष्यस्वरूपया विस्तृत-रहस्यप्रकाशिकया संस्कृतटीकया, तदनु हिन्द्यनुवादेन सह मुद्रितानि सन्ति। अष्टपद्यानाम् 'अनुत्तराष्टिका', द्वादशपद्यानां परमार्थद्वयद्वय-दशिका, विंशतिपद्यानां महोपदेशविंशतिकम्, द्वादशकालिकास्तवनपरं क्रमस्तोत्रम्, भैरवस्तवः, इत्यादीनां दशस्तोत्राणां विस्तृता भाष्यस्वरूपिणी संस्कृतटीका तान्त्रिकरहस्यानां सुविपुलं स्पष्टीकरणं प्रस्तौति। स्तोत्राणीमानि शैवागमस्य गभीरं रहस्यजातं धारयन्ति अतस्तस्य स्पष्टीकरणं वाञ्छनीयमेव।

प्रारम्भे वाराणसेयस्य विद्वत्प्रवरस्य स्व.प्रो.रेवाप्रसादद्विवेदिनः शुभाशंसा हिन्दीभाषायां, तदनु भोपालपरिसर निदेशकचरस्य प्रो.आजादमिश्रमधुकरस्य 'अभिनवगुप्तदशस्तोत्री विमर्शदर्शनम्' इति शीर्षकवहा विषयविवेचिनी-भूमिका संस्कृतभाषायां पठनीयतामर्हति।

सुप्रथितस्य विद्वन्मूर्धन्यस्य श्रीमतोऽभिनवगुप्तस्य दुर्लभानामेषां स्तोत्राणां सेयमवतारणा सर्वात्मना स्वागतमर्हति। टीकासु च प्रो.रमाकान्तपाण्डेयेन शैवागमस्य सिद्धान्तानां, स्तोत्रेषु सङ्केतितानां दुर्गमरहस्यानां च यद् विवरणं प्राञ्जलया संस्कृतभाषया प्रस्तुतमस्ति तदपि पूर्णतः श्लाघनीयम्। वर्धापयामः प्रो.रमाकान्तपाण्डेय-वर्यमस्य प्रकाशनस्याभिनन्दनीयमवतरणमुपलक्ष्य।

**अभिनवगुप्तदशस्तोत्री** (आचार्याभिनवगुप्तस्य स्तोत्राणि), सम्पादकोऽनुवादकः टीकाकारश्च प्रो.**रमाकान्तपाण्डेयः**, प्रकाशकः **जगदीशसंस्कृतपुस्तकालय**, दुकान नं. 372 की गली, चौड़ा रास्ता, **जयपुर**, पृ.सं. 160, मूल्यम् 300/-

---

# चक्रवातस्य नामधेयम्

❑ **महामहोपाध्यायदेवर्षिकलानाथशास्त्री**

**प्रधानसम्पादकः**

विगते जूनमासे 'बिपरजॉय' नामकेन चक्रवातेनाऽस्माकं देशे सुमहती आपदा समापादिताऽभूदिति विदितमेव सर्वेषाम्। किन्तु बिपरजॉय नामधेयमिदं कुत आगतमिति नाऽस्ति बहूनां परिचय इत्याश्चर्यम्। नामधेयस्यास्य मूलं संस्कृतेऽस्तीति तथ्यं न स्पष्टीकृतं पत्रकारैरपि, ऋतुविज्ञानविभोगेनाऽपि इति महदाश्चर्यम्। संस्कृतविद्वद्भिरपि यदीदं नाऽवगमितं तर्हि सुमहान् खेदः।

**बिपरजॉय**शब्दः संस्कृतशब्दस्य **'विपर्यय'** इत्यस्यापभ्रंशः। विपर्ययशब्दः वैपरीत्यार्थे, उत्पातादिप्रसङ्गे संस्कृते सुपरिचितः। प्रकृति-विपर्ययरूपाया आपदाया नामधेयमिहदं बङ्गदेशे बिपरजॉयरूपेणोच्चारितं भवति। आपदाया अस्यास्तदेव नामकरणं बाङ्गैः कृतमिति बाङ्गैर्विद्वद्भिः सूचितम्। न केवलं तैरेव, अपितु 'गूगल' नाम्न्या शृंखलयाऽपि मया वङ्गलिप्यामियं सूचनाऽधिगता यद् 'विपर्यय' नामाऽयं चक्रवातः। तथ्यमिदं किमिति न प्रसारितं देशेऽस्माकं विभिन्नैः सूत्रैरिति महतः खेदस्य विषयोऽस्ति। सूचनामिमां निवेदयितुमेव प्रस्तूयते सेयं संक्षिप्ता टिप्पणी।

- प्रधानसम्पादकः, 'भारती' संस्कृतपत्रिकायाः

नारी-स्तम्भः

# वीराङ्गना रानी चेनम्मा

❑ डॉ. राजेश्वरी भट्टः

1857 तमे खिस्ताब्दे स्फुलिङ्गायमानात् भारतस्य प्रथम स्वतन्त्रतासंग्रामात् 33 त्रयस्त्रिंशद्वर्षपूर्वं 1824 तमे खिस्ताब्दे ब्रिटिश-शासकानां दमननीत्या विरोधे सशस्त्रं संघर्षं कुर्वती, दृढ़निष्ठया, पराक्रमेण, युद्धकौशलेन च लोके कर्णाटकस्य-'रानीलक्ष्मीबाई' इति गौरवास्पदेनोपाधिना सम्मान्या, कित्तूर( कर्णाटक )राज्यस्य राज्ञी रानीचेनम्मा राष्ट्ररक्षायै मनसा-वाचा कर्मणा समर्पितासु वीराङ्गनासु अग्रगण्याऽऽसीत्। शक्त्याः प्रतिमूर्तिः चेनम्मा 23 अक्टूबर 1778 दिनाङ्के कर्नाटकप्रदेशे 'ककाटि' ग्रामे प्रधानपुरुषस्य (मुखिया) गृहे पुत्री रूपेण जनिमलभत। नवजातायाः कन्याया रूपातिशयेन मुग्धैः परिजनैः सा 'चेनम्मा' इति सार्थक- नाम्नाऽभिज्ञाता। चेनम्मायाः पिता राजकुलोत्पन्नबालिकेव आत्मनः पुत्र्याः कृते अश्वारोहणं, युद्धकौशलं, भाषाऽध्ययनं, संगीतं, नृत्यमित्यादीनां कलानां प्रशिक्षणव्यवस्थायां मनागपि शिथिलो नासीत्। प्रखरप्रतिभया दृढ़संकल्पेन च 'चेनम्मा' क्रमेण सहस्रेष्वेका प्रशंसनीया स्पृहणीया च जाता। 15 वर्षाणां वयस्येव 'कर्नाटकप्रदेशे' कित्तूरराजस्य अधिपतिना 'मल्लसर्जेन' सह चेनम्माया विवाहो विहितः। राजा मल्लसर्जः प्रजावत्सल राज्यविकासकार्येषु तत्परो नैष्ठिको राज्यरक्षक आसीत्। सर्वगुणसम्पन्नां सहचरीं प्राप्य मल्लसर्जः सर्वथा सन्तुष्ट आसीत्। समयेन दम्पत्योः प्राङ्गणं पुत्रजन्मना धन्यतरं जातम्। सहसा चेनम्मायाः सहचरः प्रजापालको राजा 'मल्लसर्जो' दिवं प्रयातः। चेनम्माया हृदयस्य शोकाग्निः सम्प्रति मन्दो नाऽभूत् तदैव तस्याः प्राधाणारः कुलदीपको राज्यस्य भाविशासकः पुत्रोऽपि क्रूरेण कालेन कवलीकृतः। ततो राजपरिवारे जातः रुद्रसर्जः राज्याधिकारी रूपेण घोषितः। तदानीन्तने समये 'कित्तूरराज्यं' 72 दुर्गैः, 358 ग्रामैः समृद्धं व्यापारस्य प्रमुख-केन्द्रमासीत्। ब्रिटिशशासकाः पूर्वमेव गृद्धदृष्ट्या कित्तूरराज्यं कवलयितुं लालायिता आसन्। दत्तकपुत्रस्य राज्यारोहणं तेभ्यः कथमपि मान्यं नाऽभवत्। ब्रिटिशशासका रुद्रसर्जं राज्यादपदस्थं कर्त्तुं कित्तूरराज्याय पत्रं प्रेषयामास। किन्तु यावज्जीवनं मातृवत् प्रजाया रक्षायै कृतसंकल्पायै चेनम्मायै ब्रिटिशशासकानां प्रस्तावोऽयं कथमपि स्वीकरणीयो नासीत्। चेनम्माया दृढ़संकल्पेन विप्रकृतैर्ब्रिटिशशासकैः 1824 तमे वर्षे कित्तूर-राज्ये सहसा आक्रमणं कृतम्। ततो दुर्गद्वारात् 'महारानी चेनम्मा' द्विसहस्रसैनिकैः सह निर्गत्य क्रुद्धसिंहिनीव सम्मुखे स्थिता जाता। अस्मिन् घोरे युद्धे पराजितैर्ब्रिटिश-सैनिकैः द्विदिवसयोरन्तरालेन पुनः कित्तूर राज्ये आक्रमणं कृतम्। अस्मिन् द्वितीये घोरे युद्धे कित्तूरराज्यस्य पराजयोऽभवत्। ब्रिटिश सैनिकैः कित्तूरदुर्गे आधिपत्यं स्थापितम्। राष्ट्रहिताय जीवन्ती चेनम्मा बन्दिनीरूपेण बेलहोंगलियादुर्गे प्रेषिता। अस्मिन् दुर्ग एव 21 फरवरी 1829 दिनाङ्के-तस्याः निधनं जातम्। किन्तु रानी चेनम्मा कीर्तिकायेन अद्यापि जीवति। 'कित्तूर राज्ये' अद्यापि दिव्यशक्तिरूपेण सा स्मर्यते। चेनम्मायाः स्मृतौ कित्तूर राज्ये द्विदिवसीयो महोत्सवोऽभिनन्द्यते। भारतस्य राजधान्यां दिल्लीनगर्यां विधानसभाक्षेत्रे चेनम्माया मूर्तिस्तस्याः बलिदानस्य गीतानि गायति। एतदतिरिक्तं चेनम्माया राष्ट्रनिष्ठा, समर्पणं, बलिदानादीन् गुणानाधारीकृत्य दूरदर्शनचित्रपटेन, संचारमाध्यमेन च समये समये अनेकाः प्रेरणात्मकाः कार्यक्रमा आयोज्यन्ते, प्रसार्यन्ते च। स्वतन्त्रताया

**अमृतमहोत्सवे चेनम्मा नूनं स्मरणीया वर्तते।**

## हिन्दी अनुवाद

1857 ई. में भारत के प्रथम स्वतन्त्रता आन्दोलन से 33 वर्ष पूर्व 1824 ई. में ही ब्रिटिश शासकों की दमन नीति के विरोध में सशस्त्र संघर्षरत दृढ़निष्ठा, पराक्रम एवं युद्धकौशल से लोक में कर्नाटक की 'रानी लक्ष्मीबाई' नाम से सम्मान्या 'कित्तूर राज्य' की 'रानी चेनम्मा' राष्ट्ररक्षा के लिए मन-वचन एवं कर्म से पूर्णत: समर्पित वीराङ्गनाओं में अग्रगण्या है। शक्ति की प्रतिमूर्ति चेनम्मा का जन्म 23 अक्टूबर 1778 ई. को 'कर्नाटक' में 'ककाटि' ग्राम के मुखिया के यहाँ हुआ था। नवजाता कन्या की रूपमाधुरी से मुग्ध परिजनों के द्वारा उसे चेनम्मा (सुन्दरी) इस सार्थक नाम से पुकारा गया। चेनम्मा के पिता ने राजकुल में उत्पन्न बालिका की भाँति अपनी पुत्री के लिए अश्वारोहण युद्धकौशल, अनेक भाषाओं का ज्ञान, संगीत नृत्यादि कलाओं के प्रशिक्षण की व्यवस्था में तनिक भी शिथिलता नहीं की। प्रखर प्रतिभा एवं दृढ़ संकल्प से चेनम्मा हजारों में एक, प्रशंसनीय एवं स्पृहणीय कन्या हो गई। 15 वर्ष की उम्र में ही चेनम्मा का विवाह कर्नाटक प्रदेश में 'कित्तूर राज्य' के अधिपति 'मल्लसर्ज' के साथ सम्पन्न हो गया। 'चेनम्मा' के पति राजा 'मल्लसर्ज' प्रजावत्सल, राज्यविकास कार्यों में तत्पर, निष्ठावान्, राज्यरक्षक थे। सर्वगुणसम्पन्ना सहचरी को प्राप्त कर राजा 'मल्लसर्ज' सर्वथा सन्तुष्ट थे। समय से दम्पती का प्राङ्गण पुत्र जन्म से और भी धन्य हो गया। सहसा 'चेनम्मा' के पति प्रजापालक राजा 'मल्लसर्ज' का निधन हो गया। 'चेनम्मा' के हृदय की शोकाग्नि अभी मन्द भी नहीं हुई थी तभी चेनम्मा के प्राणों का आधार, कुलदीपक, राज्य का भावी शासक पुत्र भी कराल काल का ग्रास बन गया। अत: राजपरिवार में उत्पन्न **'रुद्रसर्ज'** को राज्य का उत्तराधिकारी घोषित किया गया। उस समय 'कित्तूर राज्य' 72 दुर्ग एवं 358 गांवों से समृद्ध व्यापार का प्रमुख केन्द्र था। ब्रिटिश शासक 'कित्तूर राज्य' को गिद्ध की भाँति निगलने के लिए लालायित थे। अत: दत्तक पुत्र का राज्यारोहण उनके लिए सर्वथा अमान्य था। ब्रिटिश शासकों ने 'रुद्रसर्ज' को सिंहासन से अपदस्थ करने के लिए कित्तूर राज्य को एक पत्र भेजा। किन्तु आजीवन माता की भाँति प्रजा की रक्षा के लिए कटिबद्ध 'चेनम्मा' ने ब्रिटिश शासकों के इस प्रस्ताव को स्वीकृत नहीं किया। चेनम्मा के दृढ़संकल्प से क्रुद्ध ब्रिटिश शासकों ने 1824 ई. में कित्तूर (कर्नाटक) राज्य पर सहसा आक्रमण कर दिया। सहसा किले के द्वार से दो हजार सैनिकों के साथ क्रुद्धा सिंहिनी की भाँति चेनम्मा शत्रुओं के सामने युद्ध के लिए उपस्थित हो गई। इस भयंकर युद्ध में पराजित ब्रिटिश शासकों ने दो दिन पश्चात् पुन: कित्तूर राज्य पर आक्रमण कर दिया। इस दूसरे घोर युद्ध में कित्तूर राज्य की पराजय हुई तथा ब्रिटिश सैनिकों ने कित्तूर दुर्ग पर आधिपत्य स्थापित कर लिया। साथ ही राष्ट्रहित के लिए समर्पित रानी **चेनम्मा** को बन्दिनी बनाकर कर्नाटक के बैलहोंगला दुर्ग में भेज दिया। इस दुर्ग में ही **21 फरवरी 1829** ई. को वीराङ्गना चेनम्मा ने अपने प्राण त्याग दिये। यद्यपि रानी चेनम्मा आज हमारे बीच नहीं है किन्तु अपनी कीर्त्तिकाया से वह आज भी जीवित है। चेनम्मा की स्मृति में कित्तूर राज्य में प्रतिवर्ष दो दिन तक महोत्सव का आयोजन किया जाता है। भारतवर्ष की राजधानी दिल्ली में विधानसभा क्षेत्र में स्थापित 'चेनम्मा' की प्रतिमा उसके बलिदान एवं त्याग के गीत सुनाती है। इसके अतिरिक्त चेनम्मा की राष्ट्रनिष्ठा, समर्पण एवं बलिदानादि गुणों के आधार पर दूरदर्शन, चित्रपट एवं संचार माध्यमों से समय-समय पर अनेक प्रेरणात्मक कार्यक्रम आयोजित एवं प्रसारित किये जाते हैं। 'स्वतन्त्रता के अमृत महोत्सव' पर 'रानी चेनम्मा' निश्चय ही स्मरणीय है।

**- पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेज:, जयपुरम्।**

आयुर्वेद-स्तम्भः

# वर्षर्तौ पित्तस्यापनयनम् श्रेयस्करम्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**ऋतुविशेषवशाच्चाहारविहारसेवनं सुखकरम्भवत्यत एवायुर्वेदाचार्यैः ऋतुचर्यायाः प्रतिपादनं विहितम्। तदर्थमेव मासैर्द्वि-संख्यैर्माघाद्यैः क्रमात् 'शिशिरोऽथ वसन्तश्च ग्रीष्मो वर्षा शरद्धिमाः' एते षड्ऋतवः स्मृताः। तेषु वर्षाशरद्धेमन्तात्मकाः हि त्रयः ऋतवः विसर्गात्मकाः भवन्ति, यतो हि कालोऽयं विसृजति (जनयति) आप्यमंशं प्राणिनाञ्च बलम् अत एव विसर्गः। वर्तमान एषः कालः वर्षाकालो विद्यते, विसर्गस्य प्रथमो हि ऋतुः, अत्र हि सौम्यत्वात् सोमो बलवान् भवति रविश्च हीयते तथा शीतैः मेघवृष्ट्यनिलैः शान्ततापे ग्रीष्मसन्तप्तस्य महीतलस्य तापः शान्तो भवति, किन्तु कदाचिद् घर्मस्याधिक्येन जनास्त्रस्ताः भवन्ति।**

ऋतुविशेष के अनुसार आहारविहार का सेवन सुखकर होता है इसलिए ही आयुर्वेदाचार्यों के द्वारा ऋतुचर्या का प्रतिपादन किया गया है। इसके लिए 2 मास की सङ्ख्यावाली माघ इत्यादि क्रमशः 'शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद् एवं हेमंत' ये छः ऋतुएं कही गई हैं। इनमें वर्षा, शरद् एवं हेमंत ये तीन ऋतुएं विसर्गस्वरूप वाली होती हैं, क्योंकि यह काल जलीय अंश और प्राणियों के बल को उत्पन्न करता है। वर्तमान में यह काल वर्षाकाल है, यह विसर्ग की प्रथम ऋतु है, इसके सौम्य स्वरूप वाली होने के कारण इसमें सोम (चंद्रमा) बलवान् होता है और रवि क्षीण स्वरूप वाला होता है तथा शीत मेघ, शीत वृष्टि और शीत वायु के द्वारा वातावरण का ताप शांत हो जाने के कारण ग्रीष्मसन्तप्त पृथ्वीतल का ताप भी शान्त हो जाताहै, किन्तु घर्म (उमस) की अधिकता के कारण लोग त्रस्त होते हैं।

**सामान्यतया ग्रीष्मेऽग्निसादो भवति काले च तस्मिन् कालप्रभावात्तदनुरूपमेवाहारविहार-सेवनाद्वातदोषस्य शरीरे सञ्चयो भवति तथाऽऽदानग्लानवपुषामग्निः सन्नोऽपि सीदति। वर्षासु च कालप्रभावादेव वातस्य प्रकोपो जायते। अत एव यदूष्मणस्तेजनं यच्च वायोः प्रशमनं तत्तत् सेव्यम्। एतदतिरिक्तं तु भूबाष्पेणाम्लपाकेन मलिनेन च वारिणा वह्निनैव च मन्देन वर्षासु पित्तदोषस्य सञ्चयो भवत्यत एव वर्षाकाले पित्तापहारकाणामौषधयोगानामाहार-द्रव्याणामपि च सेवनङ्करणीयम्।**

सामान्यतया ग्रीष्म में अग्निसाद (अग्निमांद्य) होता है, और उस काल में काल के प्रभाव से ही उसके अनुरूप आहार-विहार को करने से वातदोष का शरीर में संचय होता है तथा आदानकाल से ग्लानियुक्त शरीर वाले व्यक्तियों की मन्द अग्नि और भी मन्द हो

जाती है। वर्षा में काल के प्रभाव से ही वात का प्रकोप होता है, इसलिए अग्नि को बढ़ाने वाले (तेज करने वाले) तथा वायु का प्रशमन करने वाले जो जो द्रव्य होते हैं उनका सेवन करना चाहिए। इसके अतिरिक्त भूबाष्प से, आहार का अम्लविपाक होने से, जल के मलिन (दूषित होने से) तथा अग्नि के मन्द होने के कारण वर्षा में पित्तदोष का सञ्चय होता है इसलिए वर्षा काल में पित्त का अपहरण करने वाले औषधयोगों का और आहार-द्रव्यों का सेवन करना चाहिए।

**आचार्यः सुश्रुतः निर्दिशति यत् सञ्चयकाल एव दोषाणां निर्हरणं श्रेयस्करं भवति, यथा-**

**सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गतीः।**
**ते तूत्तरासु गतिषु भवन्ति बलवत्तराः।।**

(सु.सू. 21/37)

आचार्य सुश्रुत निर्देश करते हैं कि सञ्चयकाल में ही दोषों का निर्हरण करना कल्याणकारी होता है, यथा-

सञ्चय अवस्था में ही अपहरण किए गए दोष बाद की गतियों को प्राप्त नहीं करते हैं, वे तो बाद की गतियों में और भी बलवान् हो जाते हैं।

**वर्षाकाले परम्परातः प्रचलितानां सात्म्यानामाहारद्रव्याणां सेवनं सुखकरम्भवति, विशेषेण तु व्यक्ताम्ललवणस्नेहं क्षौद्रवल्लघु भोजनं हितकरं भवति, पञ्चकोलावचूर्णितानि व्यञ्जनान्यग्निदीपकानि वातप्रशमनानि भवन्ति, किन्त्वधिकव्यक्ताम्ललवणात्मकानि कटुकानि च पञ्चकोलादीनि पित्ताभिवर्धकानि भवन्त्यत एवावधानतयैवैतेषां सेवनं मात्रया करणीयम्।।**

वर्षाकाल में परम्परा से प्रचलित सात्म्य आहार द्रव्यों का सेवन सुखकर होता है, विशेष रूप से तो अच्छी प्रकार से अम्लरसयुक्त, लवण एवं स्नेहयुक्त, मधु मिला हुआ लघु भोजन हितकर होता है, जिन पर पञ्चकोल के चूर्ण (पिप्पली, पिप्पलीमूल, चव्य, चित्रक एवं सोंठ इन पांचों द्रव्यों के मिले हुए चूर्ण) का अवचूर्णन किए गए व्यञ्जन अग्निदीपक एवं वात का प्रशमन करने वाले होते हैं, किंतु अधिक मात्रा में अम्ल, लवण और कटुक द्रव्य पंचकोल इत्यादि पित्त का अभिवर्धन करने वाले होते हैं इसलिए सावधानी से ही इनका सेवन मात्रापूर्वक ही करना चाहिए।

**यस्मिन् समये वर्षति पर्जन्यस्तस्मिन् समये परम्परागतरूपेण जनाः प्रतप्ते तैले तलितानां पूरिका-वटकादीनाञ्च प्रयोगं विशेषेण कुर्वन्ति, तेषु चाम्ललवणकटुकानां रसात्मकानामाहार-योगिद्रव्याणाञ्च सम्मिश्रणमवचूर्णनं कुर्वन्त्य-थवा तैर्विनिर्मितानां रागादीनाञ्चावलेहनङ्-कुर्वन्ति तैः सहैव, अत एव लौकिकभाषायां 'चाट-पकौडी' इत्यपि कथयन्ति जनास्तान् पूरिका-वटकादीन्।**

जिस समय बादल बरसता है उस समय परंपरागत रूप से लोग प्रतप्त तैल में तले हुए कचोरी-बड़े (पकौड़ी) इत्यादि का प्रयोग विशेष रूप से करते

हैं, उनमें अम्ल, लवण और कटुक रस वाले आहारयोगि-द्रव्यों का सम्मिश्रण या अवचूर्णन करते हैं अथवा उनके बने हुए चटनी इत्यादि का अवलेहन (चाटन) उनके साथ ही करते हैं इसलिए लोग लौकिक भाषा में इन कचोरी-पकौड़ी इत्यादि को 'चाट-पकौड़ी' भी कहते हैं।

**अत्र विशेषेण हरितानां मरिचानां प्रयोगमपि कुर्वन्ति जनाः। हरितानि मरिचानि तु पित्तकारकाणि भवन्ति, राजस्थानप्रान्ते तु ग्रामीणक्षेत्रेषु तानि हरितानि मरिचानि स्त्रीलिङ्गे पित्तकारी (पितकाली) इति सम्बोधनेन सम्बोध्यन्ते,वस्तुतस्तु पित्तं वर्धयन्त्येतानि हरितानि मरिचानि। अतएवातिदुर्दिन एव व्यक्ताम्ललवणकटुकात्मकानां द्रव्याणामेतादृग्विधानामाहाराणां सेवनं विशेषेण करणीयम्, अन्येषु दिवसेषु तु सामान्यं सन्तुलितं सात्म्यमनुकूलं परम्परागतमृत्वनुसारि देशानुसारि च भोजनमदोषकरं सुखकरञ्च भवति।**

इनमें विशेष रूप से लोग हरी मिर्च का प्रयोग भी करते हैं, हरी मिर्च तो पित्तकारक होती हैं। राजस्थान प्रांत में तो ग्रामीण क्षेत्रों में उन हरी मिर्चों को स्त्रीलिंग में 'पित्तकारी (पितकाली)' इस प्रकार संबोधन करते हैं। वस्तुतः यह हरी मिर्च पित्त का वर्धन करती हैं, इसलिए अतिदुर्दिन में ही ठीक मात्रा में डाले गए अम्ल, लवण और कटुक रसवाले द्रव्यों से युक्त इस प्रकार के आहारों का सेवन विशेष रूप से करना चाहिए, अन्य दिनों में तो सामान्य, संतुलित, सात्म्य, अनुकूल, परंपरागत, ऋतु के अनुसार एवं देश के अनुसार भोजन ही दोष को नहीं करने वाला और सुखकर होता है।

**अत एवावधानतया वर्षानुरूपयोराहार-विहारयोः सेवनं निर्दिशन्त्यायुर्वेदज्ञाः। पुनरपि कालप्रभावादृत्वनुरूपाभ्यामाहारविहाराभ्यामपि पित्तदोषस्योत्पत्तिः सञ्चयश्च भवत्यत एव 'वर्षर्तौ पित्तस्यापनयनम् श्रेयस्करम्' इति विचिन्त्यात्र पित्तापहारकयोरायुर्वेदीयौषधयोगयोर्द्वयोरुल्लेखः क्रियते, तयोःसेवनं नियतकालपर्यन्तं पृथक्-पृथक् काले वैद्यनिर्देशेन करणीयम्।**

इसलिए आयुर्वेदज्ञ सावधानीपूर्वक वर्षा के अनुरूप आहार-विहार का सेवन निर्दिष्ट करते हैं, फिर भी काल के प्रभाव से ऋतु के अनुरूप आहार-विहार से पित्तदोष की उत्पत्ति और संचय होता है। इसलिए वर्षा ऋतु में पित्त को दूर करना ही कल्याणकारी होता है, ऐसा सोचकर पित्त का अपहरण करने वाले दो आयुर्वेदीय औषधयोगों का उल्लेख किया जा रहा है, उन दोनों का सेवन नियत कालपर्यंत पृथक्-पृथक् समय में वैद्य के निर्देश से करना चाहिए।

**फलत्रिकादिक्वाथः-**

**वर्षर्तौ मध्यम उत्तरे वा काले फलत्रिकादिक्वाथस्य प्रयोगः श्रेष्ठो भवति, यतो हि वर्षासु कालप्रभावात् पित्तस्य सञ्चयो भवति, कालेऽस्मिन् प्रयुक्तः फलत्रिकादिक्वाथः सञ्चितस्य स्वल्पमात्रस्यापि पित्तस्यापाकरणं करोति ज्वरच्छर्द्यम्लपित्तादीनाञ्च रोगाणां**

निवारणं करोति। क्वाथश्चायं भैषज्यरत्नावल्यां समुल्लिखितो वर्तते। यथा हि-

**फलत्रिकं पटोलञ्च तिक्ताक्काथः सितायुतः।**
**पीतः क्लीतकमध्वाक्तो ज्वरच्छर्द्यम्लपित्तजित्॥**
**( भै.र.अम्लपित्तरोगाधिकारः )**

**वर्षाकाले योगो ह्येषः सप्तदिनपर्यन्तमेव सेवनीयः, तदपि वैद्यनिर्देशेनैव।**

फलत्रिकादिक्काथ -

वर्षा ऋतु के मध्यमकाल या उत्तरकाल में फलत्रिकादिक्काथ का प्रयोग श्रेष्ठ होता है, क्योंकि वर्षा में काल के प्रभाव से पित्त का सञ्चय होता है, इस काल में प्रयुक्त फलत्रिकादिक्काथ सञ्चित स्वल्पमात्र भी पित्त को दूर करता है। ज्वर-च्छर्दि-अम्लपित्तादि रोगों को दूर करता है। यह क्वाथ भैषज्यरत्नावली में उल्लिखित है। यथा -

त्रिफला, पटोलपत्र, कुटकी इन तीनों का क्वाथ मिश्री मिला कर तथा मुलहठी एवं शहद मिला कर पिलाने से यह ज्वर-च्छर्दि एवं अम्लपित्त को जीतता है।

वर्षाकाल में यह योग सात दिन तक ही प्रयुक्त करना चाहिए, वह भी वैद्य के निर्देश से ही।

**पित्तापहारी हिमः-**

**सायङ्काले त्रिसङ्ख्यात्मकानि खण्डीकृतानि पिण्डखर्जूराणि खण्डीकृताश्चैव पञ्चसङ्ख्यात्मिकाः मृद्वीकाः, पञ्चग्रामपरिमिताञ्च मनाक् क्षुण्णां मञ्जिष्ठां ग्रामैकपरिमितानि च मार्कण्ड्याः किञ्चित्क्षुण्णानि पत्राणि गृहीत्वा तत्सर्वमेकीकृत्य 500 मिलिलीटरपरिमिते जले क्षिप्त्वा पिधाय न्यसेत्। होरानन्तरन्तु तत्सर्वं किञ्चिन्मर्दयेत् पुनः रात्रिपर्यन्तं न्यसेत्, प्रातर्निष्कम्पमास्राव्य तज्जलं वारैकं वारद्वयं वा पिबेत्।**

**योगो ह्येषः भिषङ्निर्देशेन सप्तदिनानि यावदेव सेवनीयः ।**

**योगावेतौ सर्वदा पित्तस्यापनयने श्रेयस्करौ स्तः, अत एव श्रद्धया सेवनीयौ ।**

पित्तापहारी हिम-

सायङ्काल संख्या में तीन टुकड़े किए गए पिंडखजूर और टुकड़े की गई ही पांच संख्या वाली मुनक्का तथा 5 ग्राम कुछ कूटी हुई मंजिष्ठा को तथा 1 ग्राम कुछ कूटे हुए सनाय के पत्तों को लेकर उन सब को एक जगह मिलाकर 500 मिलीलीटर पानी में डालकर ढक कर रख देना चाहिए। एक घंटे के बाद उन सबको कुछ मसल देना चाहिए फिर रात्रिपर्यंत रख देना चाहिए, प्रातःकाल विना हिलाए उसको निथार कर एक बार में या दो बार में पीना चाहिए ।

यह योग वैद्य के निर्देश से सात दिन तक ही सेवन किया जाना चाहिए । ये दोनों योग सर्वदा पित्त के दूर करने में श्रेष्ठ हैं, इसलिए श्रद्धा से सेवन करने चाहिए।

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,